## फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अंनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्


**संस्कृतप्रसारपरिषद्**
**आरा (विहारः)**

संस्कृतप्रसारपरिषद्, आरा (विहारः) सरस्वती नः सुभगा मयस्करत्

**अष्टादशं वर्षम्, प्रथमोऽङ्कः**
**मार्च 2011**

## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कं पञ्चाशत् (50) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चविंशतिः रूप्यकाणि वर्त्तते। शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम्।
(क) धनादेश (M.O) द्वारा शुल्कप्रेषणं **श्री नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीरस्थान, मौलाबाग, आरा( विहार )-802301** दूरभाषः-09431451895 नाम्ना करणीयम्।
(ख) बैंक ड्राफ्ट '**संस्कृतप्रसारपरिषद्**' इति नाम्ना '**आरा**' (**विहारः**) नगरे व्यवहरणीयं कृत्वा **श्रीनीलमणि पाठकस्य** उपरिलिखिते (3.क इत्यत्र) सङ्केते प्रेषणीयम्।
4. विमर्शात्मिका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते। अस्वीकृता लेखा निर्धारित-'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **डॉ. गोपबन्धु मिश्रः, प्रोफेसर, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।

# आरण्यकम्

**संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्**

**वर्षाङ्कौ - अष्टादशं वर्षम्, प्रथमोऽङ्कः**

**चैत्रः, वि.सं. २०६८**

**मार्च, २०११**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

प्रत्यङ्कम् - २५ रूप्यकाणि
संयुक्ताङ्कः - ५० रूप्यकाणि
वार्षिकं शुल्कं ५० रूप्यकाणि

परामर्शदात्री समितिः

डॉ. सुरेशचन्द्र गो. काण्टावाला, बड़ोदरा
डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

सम्पादकः
**प्रो. गोपबन्धु मिश्रः**
संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः, वाराणसी
वर्तमानः अतिथ्यध्यापकः (संस्कृतम्)
सोर्बोन नोवेल विश्वविद्यालयः, पेरिस (फ्रान्स)

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

देशो देशान्तरम् इव भाषा भाषान्तरं च। एकस्माद् देशाद् अपरं देशं गच्छामश्चेत्तदर्थं यथा परिचयपत्रं (Passport) तथा च ततः प्रवेशानुमत्या सह वासानुमतिः (Visa) अपेक्ष्येते तथैव एकस्या भाषाया अपरां भाषां प्रविशामश्चेत् प्रथमभाषाविषये पूर्णा परिचितिस्तथा च प्रविश्यमानभाषायां प्रवेशार्हतया सह तत्र दीर्घकालं पूर्णकालं वा यावत् वासयोग्यताऽपेक्ष्यत एव। देशान्तरगमनविधिरिव अयं भाषान्तरचङ्क्रमण-विधिरपि बहुपुरातनकालात् प्रचलन्नस्ति। अस्मिन् विधौ देशान्तरप्रसङ्गे मूलदेशस्येव मूलभाषायाः प्राधान्यमनस्वीकार्यमेव। आ बहोः कालात् अस्मिन् प्रसङ्गे संस्कृतभाषा मूलभाषारूपेण तादृशं प्राधान्यं निरुह्य विश्वस्य विविधासु भाषासु आत्मनः रूपान्तरं सम्यक् साधितवती अस्ति। आधुनिकप्रयोगदृष्ट्या 'अनुवाद' (Translation) पदवाच्योऽयं भाषान्तरविधिः मूलत एव स्वेतरभाषागतसाहित्यदर्शनाद्यवगतये प्रमुखसाधनरूपेण विद्यमानाऽस्ति। वयमत्र सहजबोध्यतया 'भाषान्तर' इत्यस्य स्थाने 'अनुवाद' इति शब्दं व्यवहरिष्यामः।

संस्कृतभाषया निबद्धाः वेदादिग्रन्थाः नाट्यशास्त्रादिविविधशास्त्राणि न केवलं साक्षात् संस्कृतं शिक्षमाणानां संस्कृतशिक्षाविदां कृते सुलभानि सुबोध्यानि अभवन् अपि तु इतरभाषायाम् अनूदितान्येतानि विश्वस्य विविधेषु स्थलेषु समितानि सन्ति। अनुवादविधिं विना संस्कृतभाषानिबद्धग्रन्थानामेतादृशी प्रसृतिः वैश्विको विस्तारो वा सुतराम् अशक्य एव।

ख्रीष्टीयैकादशशतकात् परं संस्कृतग्रन्थानाम् आधुनिकभारतीयभाषासु अनुवादविधिः प्रारब्धः। कश्मीरशासकः जेन-आल-आवेदिन (1420-1470) एकामनुवाद-समितिमरचयत्। एषा समितिः संस्कृतग्रन्थानां पारसिकभाषायाम् अनुवादं विधातुम् उद्दिष्टा आसीत्। 17-18 ख्रीष्टीयशतके सिक्खगुरुः गोविन्दसिंहः अनेकसंस्कृतग्रन्थानाम् अनुवादं पंजाबीभाषायाम् आकारितवान्।

अष्टादशे नवदशे च शतके संस्कृतात् आङ्ग्लभाषायाम् इतर-यूरोपीयभाषासु चाऽनुवादक्रम आरब्धः। नवदशशतके प्रमुखयूरोपीयविश्वविद्यालयेषु 'संस्कृतासन्दः' (Sanskrit Chair) आसीत्। 1839-40तमे वर्षे जर्मनभाषया टीकया सह पाणिनेः अष्टाध्यायी otto Bohtlink महोदयेन प्रकाशिता। 1841तमे वर्षे लेटिन-शब्दसूच्या सह धातुपाठः N.L. Westerguard महोदयेन प्रकाशितः। 1858तमे वर्षे Atbrecht Weber महोदयेन 'वाजसनेयी प्रातिशाख्य'स्य जर्मन-अनुवादो विहितः। 1862तमे वर्षे W.D. Whitney महोदयेन अथर्ववेदसंहितायाः आङ्ग्लानुवादः कृतः। 1874तमे वर्षे Lorez Franz Kielhorn महोदयेन नागेशभट्टविरचितस्य परिभाषेन्दुशेखरस्य आङ्ग्लानुवादो विहितः। 1844तमे वर्षे श्रीमद्भागवतपुराणस्य फ्रेंचभाषया प्रथमाऽनुवादः (Le Bhagavata Purana) M. Eugene Buroff महोदयेन कृतः तथा च पारिसस्थ Imprimerie Royala संस्थया प्रकाशितः। एतस्मिन् अनुवादे रोमनलिप्यां संस्कृत-आकारादि- ध्वनीनां कृते चिह्नानि अपि प्रयुक्तानि, तन्मुखेन च संस्कृतभाषागतमूलरूपसंरक्षणाय निष्ठाऽपि सम्यक् स्फुटा भवति। श्रीमद्भगवद्गीतायाः M. Charles Wilkins द्वारा कृतस्याङ्ग्लानुवादस्य फ्रेंचभाषयाऽनुवादः M. Parraud महोदयेन 1787तमे वर्षे कृतः, अनूदितग्रन्थेऽस्मिन् भारतीयधर्मविषये नीतिविषये च विशिष्टा भूमिकाऽपि फेंचभाषया विद्यते। ग्रन्थस्य नाम एवं विद्यते- -'Le Bhaguat-Geeta', or dialogues de kreeshna etd'Arjoon' (श्रीमद्भगवद्गीता, श्रीकृष्णार्जुनयोः संवादः)। अस्मिन् ग्रन्थे रोमनलिप्यां संस्कृतदीर्घादिध्वनीनां कृते चिह्नानि न स्वीकृतानि सन्ति इत्यतः 'कृष्ण' इत्यादेः कृते 'Kreeshna' इत्यादि लेखप्रकारा अङ्गीकृताः।

स्थालीपुलाकन्यायेन दर्शितेषु एतेष्वनुवादप्रसङ्गेषु संस्कृतवाङ्मयम् आदिमस्रोतोरूपेण दृश्यमानमस्ति। समीक्षकैः एतदर्थं 'Donor' (दाता) 'Recipient' (ग्रहीता) इति शब्दौ प्रयुज्येते। संस्कृतभाषया निबद्धस्याऽखिलवाङ्मयस्य तदितरभाषयाऽनुवादप्रसङ्गे गतशतकेभ्यः संस्कृतवाङ्मयमिदं 'दातृ' रूपेण विद्यमानमस्ति। किन्तु इतरवाङ्मयतः संस्कृतेनानूदिता ग्रन्था अत्यन्तमेव न्यूनाः। आङ्ग्ल-फ्रेंच-जर्मनादियूरोपीयवाङ्मये यथा तत्तद्भाषया रचिता ग्रन्थाः सन्ति, तथा



तदितर-'दातृ' वाङ्मयतः तत्तदाङ्ग्लादिभिः भाषाभिः अनूदिता ग्रन्था अपि विपुलतया उपलभ्यन्ते। तेनाऽपि कारणेन तत्तद्वाङ्मयं समृद्धतरं लक्ष्यते। किन्तु संस्कृतवाङ्मये 'इतरवाङ्मयत अनुवादमुखेनाऽऽहरणस्य पक्षो दुर्बलो विद्यते, अतः आधुनिकजगति इतरभाषासाहित्यसमग्रतुलनायां संस्कृतं समानमानं नार्जयति। भारतवर्षस्य 'साहित्य-अकादमी' इव संस्थाः संविधाने स्वीकृतासु सर्वासु भारतीयभाषासु तदितरभाषातः अनुवादकरणे तादृशानुवादसाहित्यप्रकाशने चोद्यमं प्रारब्धवत्यः सन्ति। किन्तु तादृशः प्रयत्नः अपेक्षितपरिमाणदृशा पर्याप्तः नास्ति। अत एतस्मिन् प्रसङ्गे, अर्थतः इतरभाषाग्रथितानां साहित्य-दर्शन-समीक्षादिग्रन्थानां संस्कृतभाषयाऽनुवादकरणे प्रवृत्तिः सुतराम् अपेक्ष्यत एव।

गते दशकत्रये रवीन्द्रनाथठाकुर-शरच्चन्द्र-मुंशीप्रेमचन्दादिप्रसिद्धलेखकानां तत्तद्-बंग-हिन्द्यादिग्रथितसाहित्यानाम् अंशविशेषाः (न तु पूर्णाः) संस्कृतेन अनूदिताः प्रकाशिताश्च। संस्कृतभारती, नई दिल्ली पक्षतोऽपि अनेकेषां चितानां भारतीयभाषा-ग्रथितग्रन्थानां संस्कृतानुवादम् उद्दिश्य काचिद् बृहद्योजना प्रचाल्यमानाऽस्तीति सुखावहोऽयं प्रसङ्गः।

ग्रहीतुः कृते अनुवादप्रसङ्गे 'दातृ'-वाङ्मयस्य मूलो भावः सर्वादौ अवगन्तव्यः, स च सर्वतो रक्षणीयः, मूलग्रन्थस्य भाषा प्रौढा क्लिष्टा सरला वा भवतु नाम, अनुवादकाले सरलो मार्गोऽवलम्बनीयः। विशिष्टतया संस्कृतानुवादप्रसङ्गे संस्कृतभाषा सरला सहजबोध्या क्लिष्टसमासरहिता लघु-लघुवाक्यान्विता च भवेत्। अर्थात् अनुवादप्रसङ्गे कोशगतशब्दपरिवर्तनं (भाषानुवादो वा) अकृत्वा भावानुवादः करणीयः।

यदा मया 'पेरिस' नगरे उपरिलिखितयोः श्रीमद्भागवतपुराण-श्रीमद्भगवद्गीतायाः फ्रेंच-भाषानुवादद्वयं दृष्टम् (तत्र प्रथमं तु मूल-श्रीमद्भागवतपुराणस्य 'देवनागरी' लिप्या सह अनूदितसम्पूर्णपुराणस्य परिमाणभूयिष्ठत्वात् बृहदाकारमेव), तदा समधिकसुखदाश्चर्यानुभूतिस्समायाता, किं च फ्रेंचजनानां स्वभाषाप्रीतिरपि मां भूयोऽमोदयत्। सार्धद्विशतकात् त्रिशतकाद् वा ऊर्ध्वं तस्मिन् काले 'के कति वाऽस्य पाठकाः, को वा लाभ एतेनानुवादेन' इत्यादि प्रश्नान् अविचार्य अनुवादकैः अनुवादकार्यं सम्पादितं स्यात्। किम् एतादृशैः निष्ठापरैः कार्यैः वयं प्रेरिताः स्याम?

संस्कृतवाङ्मयनिहिततथ्यानुसन्धित्सुभिः यथा संस्कृतग्रन्थाः संस्कृतेतरभाषाभिरनूदिताः तथा इतरभाषानिबद्धज्ञान-विज्ञान-कला-संस्कृतिः-विषयैः सह संस्कृताध्येतारोऽपि परिचिताः स्युरिति धिया किं संस्कृतानुवादकार्यम् अग्रे न सारणीयम्? किं पुस्तकालयेषु अस्माकं गृहेषु च संस्कृतग्रन्था इव संस्कृतानुवादग्रन्था अपि पाठकान् नाकर्षेयुः? एतादृशाः प्रश्नाः इदानीं संस्कृतविदुषां मनसि समुदीयुः। यद्यत्रोत्तरं भावात्मकं स्यात् तर्हि विविधभाषासु निबद्धान् उत्तमान् काव्य-दर्शन-समीक्षादिग्रन्थान् चित्वा तेषामनुवादे त्वरितं प्रवर्तनीयम्।

भावदशायां कार्यनिष्पत्तये ज्ञानम्, इच्छा क्रियेति त्रितयगतिरभीष्टा भवति। अस्मिन्ननुवादप्रसङ्गेऽपि आदौ इतरभाषागतोत्तमसाहित्यज्ञानम् ततस्तस्यानुवादकर्मणीच्छा (संयमिच्छा संस्कृतवाङ्मयसमृद्धये स्यान्न त्वितरभौतिकोपलब्धये), तदनन्तरं क्रिया अर्थात् अनुवादकर्म इति एतत् त्रयम् अवश्यमेव परिणामसुखावहं सम्पत्स्यते। अत्रेदम् आशास्यते यत् संस्कृतविद्वांसोऽस्मिन् कर्मणि अग्रेसरा भूत्वा संस्कृत-वाङ्मयागारम् अनुवादग्रन्थैः संवर्धयिष्यन्तीति।

आरण्यकस्य सम्पादकस्य विदेशावस्थानकारणेन (फ्रांस देशस्य 'पेरिस' नगरे विद्यमानं सोर्बोन नोवेल विश्वविद्यालयं प्रति संस्कृतस्य अतिथ्यध्यापक (Visiting Profesor) रूपेण भारतीयसांस्कृतिकसम्बन्धपरिषद् (ICCR) नईदिल्ली द्वारा चितः भूत्वा अक्टूबर 2010तः वर्षद्वयं यावत् अत्र स्थितिः) आरण्यकस्य प्रकाशने क्लिम्बोऽभूत्। अग्रेऽनियतकालिकतां निश्येतुं प्रयतिष्यामहे।

विदुषां वशंवदः

गोपबन्धु मिश्र

सम्पादकः



# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| १. नैषधीयचरिते अर्थानौचित्यविचारः | डॉ. सदाशिवकुमारद्विवेदी<br>एसोसियेट प्रोफेसर, संस्कृतविभागः,<br>कलासङ्कायः, काशी हिन्दू विश्वविद्यालयः,<br>वाराणसी | १ |
| २. भारतीयः वाक्यसिद्धान्तः-एकमनुशीलनम् | बनमाली बिश्वालः<br>राष्ट्रियसंस्कृतसंस्थानम्<br>गङ्गानाथ-झा-परिसरः,<br>चन्द्रशेखर आजाद पार्क,<br>इलाहाबाद | ११ |
| ३. आस्माकी यात्रां-संस्कृतिः | डॉ. रञ्जना कुमारी<br>पूर्व शोधच्छात्रा, संस्कृतविभागः<br>पटना विश्वविद्यालयः, पटना<br>एवम्<br>डॉ. अमरनाथ ठाकुरः<br>अध्यक्षः, संस्कृतविभागः,<br>जयप्रकाशविश्वविद्यालयः,<br>छपरा | ३७ |
| ४. दयानन्दसम्मता स्त्रीशिक्षा | डॉ. सोमनाथ साहुः<br>राष्ट्रियसंस्कृतसंस्थानम्,<br>राजीवगाँधीपरिसरः,<br>शृङ्गेरी | ५१ |

| विषयः | लेखकः | पृष्ठम् |
| --- | --- | --- |
| ५. रघुवंशवर्णिते समाजे लौकिकी प्रथा | डॉ. मञ्जू कुमारी वाराणसी | ५९ |



# नैषधीयचरिते अर्थानौचित्यविचारः

डॉ.सदाशिवकुमारद्विवेदी

संस्कृतकाव्यपरम्परायामस्ति महाकविना श्रीहर्षेण विरचितस्य द्वाविंशतिसर्गात्मकस्य नैषधीयचरितमहाकाव्यस्य[1] अनितरसाधारणं महत्त्वम्। पाण्डित्यपूर्णा काव्यशैली अत्र नितरां राजते प्रतिपदं प्रकाशयन्ती भगवत्याः वाग्देव्या अपूर्वप्रसादभाजनतां महाकवेः। उत्प्रेक्षागर्भगर्भिता कविताऽत्र सहृदयचञ्चरीकानत्यन्तं चमत्करोति शास्त्रानुशीलनतत्परान्। कविरसौ सर्वत्र स्वकाव्ये शास्त्रपाण्डित्यान्वितां वृत्तिमेवानुसरति काव्यमुखेन प्रतिपादयितुं स्वाभिप्रायानुत्प्रेक्षागर्भितान् नवीनार्थाञ्चितान् च।

महाकाव्यस्यास्य प्रथमसर्गे केचन अर्थाः तर्कस्य सरणिमननुसरन्तः सहृदयानां हृदि नावतरन्ति। निषधाधिपतेः नलस्य अप्रतिमां वीरतां वैशद्येन वर्णयति महाकविरसौ प्रथमसर्गस्य आदावेव पद्येष्वनेकेषु। अस्मिन्नेव क्रमे शत्रूणां समूलोन्मूलनार्थप्रतिपादकमेकं पद्यमेवं वर्तते–

**निवारितास्तेन महीतलेऽखिले निरीतिभावं गमितेऽतिवृष्टयः।**
**न तत्यजुर्नूनमनन्यसंश्रयाः प्रतीपभूपालमृगीदृशां दृशः।।1.11।।**

षट्संख्याका अतिवृष्ट्यादयः ईतयः प्रतीपभूपालानां नायिकानां नेत्राणि न तत्यजुरित्यत्र प्रधानभूतोऽर्थः। अनेनाभिव्यज्यते चक्रवर्तिनोऽस्य राज्ञः सम्पूर्णेऽपि राज्ये सर्वथैव ईतिराहित्यम्। ईतयः सन्ति–

**अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः खगाः।**
**प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः।।**

ईतीनां षट्संख्याकत्वमस्ति प्रसिद्धं सर्वत्र। सर्वास्वप्येतासु स्वराज्यान्निष्कासितासु ईतिष्वेका अतिवृष्टिरूपा संदृश्यते शत्रुस्त्रीणां नेत्रेषु प्रतिष्ठिता। पतीनां विनाशेन शोकाग्निसंतापितहृदया एताः निरन्तरमश्रुपातं कुर्वन्तीति तासां नेत्राणामतिवृष्ट्या आक्रान्तत्वेनोत्प्रेक्षणे हेतुः। पद्येऽस्मिन् 'निरीतिभावम्' इत्यस्य पदस्य प्रयोगेणाऽत्र

सर्वासामेव ईतीनां समूलोन्मूलता प्रतीतिपथमवतरति। 'अतिवृष्ट्य' इत्यनेन बहुवचनान्तेन पदेन सर्वासामेव ईतीनां ग्रहणम् अतिवृष्टिरूपायाः प्राचुर्येण स्थितिरित्युभावप्यर्थावभिव्यज्येते। कतरोऽत्र ग्राह्यः? पूर्वस्यार्थस्य ग्रहणेन अवशिष्टा अन्या ईतयः कथमवलम्बन्ते प्रतीपभूपालमृगीदृशां दृशम् इति सहृदयाः नावगन्तुं शक्नुवन्ति। वाच्यत्वेन अर्थोऽयमवतरत्येव प्रतीतिपथं सहृदयानाम्।

पद्येऽस्मिन् 'तत्यजुः' इत्यस्य बहुवचनान्तस्य क्रियापदस्य प्रयोगात् सर्वासामेव ईतीनामेककालावच्छेदेन प्रतीपभूपालानां स्त्रीणां नेत्रेषु विद्यमानत्वमत्रास्ति कवेरभिप्रेतमिति स्पष्टमवबुध्यते। षट्संख्याकानामीतीनां मध्ये शत्रुमृगीदृशां नेत्रेषु एकस्या एव अश्रुपातत्वेनोत्प्रेक्षिताया अतिवृष्टेः दर्शनमन्यासामवशिष्टानां पञ्चसंख्याकानामदर्शनञ्च बहुवचनान्तस्यास्य क्रियापदस्य प्रकटयत्यनौचित्यम्। राज्याद् बहिष्कृता ईतयः प्रतिपक्षिणां राज्यमेवाश्रितवत्यः विद्योतन्ते इत्येष कवेरभिप्रायः प्रतीतिपथं नावतरति समनन्तरमेव यतो हि तत्यजुरिति बहुवचनान्तेन क्रियापदेन सह शत्रुराज्यस्य कर्मत्वेनान्वयः नास्त्यत्र कवेरभिप्रेतः। अनन्यसंश्रया ईतयः शत्रुराज्ये निवसन्तीत्यपि अर्थः प्रतीतिपथमनारोहति शत्रुराज्यस्यापि समित्स्वीकरणानन्तरं नलराज्यत्वेनैव परिकल्पितत्वात्।

नैषधीयचरितस्य टीकाकारः नारायणोऽत्र एवं विचारयति–'**तेन नलेन अखिले महीतले निवारिताः प्रतिषिद्धाः निष्कासिता इत्यर्थः अतः अनन्यविश्रमाः न विद्यतेऽन्योऽन्यत्र वा विश्रमो विरामस्थानं यासां ताः।**[2] **अनेन सर्वेऽपि शत्रवो निहता इत्युक्तम्। यच्च येन निष्कास्यते तत्तद्वैरिणमाश्रयति। स्त्रीणां च स्त्रिय एव शरणमित्युक्तिः।**'

पद्येऽस्मिन्नखिलत्वावच्छिन्नतया महीतलस्य प्रतिपादनात् तद्गतानां शत्रुस्त्रीणामपि तदाश्रयीभूतत्वात् तासु उत्प्रेक्षिता ईतीनामवस्थितिः ईतिराहित्यविरोधमेवाभिव्यंजयति। वैरिराज्यस्यापि नलराज्यत्वेन परिकल्पितत्वात् तत्रस्थानां स्त्रीणां नेत्रेषु ईतीनां स्थितिः नलराज्य एव ईतिस्थितिमभिव्यञ्जयति। ईतिपदस्य स्त्रीवाचकत्वात् शत्रुस्त्रीनेत्रैः सह स्त्रीसाम्याद्यदुभयोरपि मध्ये आश्रयाश्रयिभावपरिकल्पनम् असमीचीनमेव षट्संख्याकासु ईतिषु एकस्या एव शत्रुस्त्रीनेत्रेषु दृश्यमानत्वात्। शलभादिभिः शत्रुस्त्रीनेत्राणामाक्रान्तत्वमनौचित्यपूर्णं प्रतिभाति भूमात्रैकावलम्बितत्वात् तेषाम्। नलेनाधिगतस्य अखिलस्यापि महीतलस्य ईतिराहित्यं द्योतयन् कविरसौ ईतित्वेन विद्यमानानां प्रत्यासन्नानां राज्ञामाश्रयत्वेन परिकल्पयति शत्रुस्त्रीनेत्राणि।. अखिलमहीतलभूपालेन नलेन निर्मूलीकृता ईतिरूपेणोत्प्रेक्षिता प्रतिपक्षिणः प्रतिपक्षस्त्रीनेत्राश्रितत्वेन कथं नलराज्यस्य प्रत्यासन्नत्वे



भजन्ते इति नावगन्तुं शक्यते। एकत्र सर्वेषामेव शत्रूणां विनाशः अन्यत्र तेषामेव प्रत्यासत्तिः शत्रुस्त्रीनेत्रनिवासत्वेन परस्परं विरुद्धमेवार्थमभिव्यञ्जयति। एवञ्च 'अनेन सर्वेऽपि शत्रवो निहता इत्युक्तम्' इति टीकाकारस्य नारायणस्य वचनमपि सर्वासामेव ईतीनां निर्मूलतामनन्यविश्रमत्वेन शत्रुस्त्रीनेत्राश्रितत्वञ्च प्रकाशयति। उपर्युक्तानां विरोधततीनामवतरणे कारणतां प्रतिपद्यते अर्थोऽयं चमत्कारैकलाभाय काव्याध्ययनाय उन्मुखानां सचेतसां हृदि।

अनौचित्यार्थगर्भितेयमुत्प्रेक्षा सहृदयानां हृदि नावतरति झटित्येव गूढार्थप्रकाशकत्वात् व्यङ्ग्यमुखेन। यतो हि अतिवृष्टिपदस्य बहुवचने कर्तृत्वेन प्रयोगः 'तत्यजुः' क्रियायाः औचित्यं प्रमाणयति। यद्यपि पतिविनाशेन विलपन्तीनां बहुसंख्याकानां शत्रुस्त्रीणां बहुवचनान्तेनोत्प्रेक्षणमतिवृष्टिपदेन अर्थौचित्यस्य संस्थापनाय साहाय्यं विधत्ते तथापि सर्वासामेव ईतीनां निर्मूलत्वमनेन समाधानेन काठिन्येनैवावगम्यते सहृदयैः। न तर्कैकनिकषावलम्बिनः न च तर्कशून्या एवार्थाः सहृदयहृदयेष्वतरन्तीति प्रसिद्ध्या अत्र परस्परविरोधिनाम् ईतीनामेकानेकराहित्यविषयस्य प्रसिद्धस्यापि तर्कशून्यस्यार्थस्य प्रकाशनं न चमत्करोति सहृदयान्।

नैषधीयचरितस्य प्रथमसर्गे विरोधाभासमुखेन महाकविरसौ चक्षुःश्रवसां प्रियासु विरुद्धयोः स्तुतिनिन्दारूपयोः द्वयोर्व्यापारयोः एककालावच्छेदेन एकाश्रयत्वेन चोपवर्णनं करोत्येवम्–

**अदस्तदाकर्णि फलाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाफलम्।**
**इति स्म चक्षुःश्रवसां प्रिया नले स्तुवन्ति निन्दन्ति हृदा तदात्मनः।।1.28।।**

निषधाधिपतेः नलस्य गुणानां श्रवणेन चक्षुःश्रवसां नागानां स्त्रियः आत्मानं फलाढ्यजीवितं मन्वानाः नेत्रद्वयं स्तुवन्ति नलस्य अदर्शनत्वादफलं मन्वानाः नेत्रद्वयं कुत्सयन्ति च।

नागकन्यका अत्र नलदर्शने असमर्थाः नेत्रदोषविशेषेणाक्रान्तत्वादित्येषः अर्थोऽत्र अभिव्यज्यते विरोधाभासमुखेन। नले निमग्नचित्ताः नागकन्यकाः नलं द्रष्टुमसमर्थाः पाताललोकनिवासेन, न पुनः केनापि नेत्रद्वयजनितदोषविशेषेण। नास्त्यत्र नलदर्शनबाधायां नेत्रयोर्दोषः अपितु तासां निवास एवात्र दोषायते। यतो हि पाताले निवासः जनयति असामर्थ्यं नलदर्शनसमर्थेषु तासामदुष्टेष्वपि नेत्रेषु नलदर्शनविषयकम्। भूगर्भादुद्धृत्य नलस्वरूपदर्शने असमर्था एताः समर्थयोरप्यात्मनः नेत्रयोः निन्दायां कथं प्रवृत्ता इति

नावगन्तुं शक्यते। निन्दाभाजनत्वं नेत्रयोर्दोषविशेषाश्रितत्वेनैव सम्भवति अतः कविना निन्दा न कारयितव्या अत्र अदुष्टयोरपि तयोः। नेत्रयोः दोषदर्शनेन किमप्यसामर्थ्यमेवाभिव्यज्यते भौतिकं तत्रस्थं तेन चाभिव्यज्यते अत्यन्तमयोग्यता दृष्टिदोषविशेषेणाक्रान्तानां नागकन्यकानां हृदयेन नलमवाप्तुकामानाम्। अन्यकृतदोषस्यान्यस्मिन् उत्प्रेक्षामुखेन परिकल्पनं पदार्थस्य विगुणीकरणमेव नालङ्कारायतेऽत्र कवितायाम्। नागकन्याभिः कथं स्वकीयमदृष्टं न विगीयते यस्य प्रभावादेताः लब्धजन्मानः भूगर्भे। विधाता अत्र भजते हेतुत्वं तासां स्वस्थेष्वपि नेत्रेष्वसामर्थ्यस्योत्पत्तौ नलदर्शनविषयकम्। स्तुतिरत्र आभिः करणीया नेत्रयोः गुणाकर्णनपरयोः निन्दा च स्वादृष्टस्य विधातुर्वा सत्यप्यदुष्टनेत्रसम्पन्नत्वे ताभ्यो नलदर्शनसामर्थ्यस्य अलाभात्।

नैषधस्य प्रथसर्गे नलदमयन्त्योः पूर्वानुरागवर्णनप्रसङ्गे कामदेवस्य तिरस्कृतिरधिरोहति पराकाष्ठाम्। एकत्र कामदेवस्य भौतिकं स्वरूपं प्रतिपदमुपेक्ष्यते कविना अन्यत्र पुनः नायकनायिकयोः परस्परानुरागोत्पत्तौ तस्यैव मकरकेतोः मनसिजत्वं लभते प्रभविष्णुताम्। कामदेवस्य उपेक्षाविषये कविरत्र उत्प्रेक्षामुखेनोत्प्रेक्षयति यद् दमयन्ती बिभेति कामदेवादनिमेषलोचनत्वेन मृतपुरुषवद् विद्यमानत्वादेवम्–

**स्मरात्परासोरनिमेषलोचनाद् बिभेमि तद्भिन्नमुदाहरेति च।**

**जनेन यूनः स्तुवता तदास्पदे निदर्शनं नैषधमभ्यषेचयत्।।1.36।।**

देवानामस्यां स्वभावसिद्धायामनिमेषलोचनतायां परगतासुत्वपरिकल्पनं वैगुण्यायैव कविकर्मणि प्रवृत्ताय कवये। सैषा अनिमेषलोचनता अस्मिन्नेव सर्गे पूर्वं देवस्त्रीभिः अधिगताऽस्ति निर्निमेषलोचनतया अतिमात्रं नलदर्शनं कृतवतीभिरेवम्–

**निमीलनभ्रंशजुषा दृशा भृशं निपीय तं यस्त्रिदशीभिरर्जितः।**

**अमूस्तमभ्यासभरं विवृण्वते निमेषनिस्वैरधुनाऽपि लोचनैः।।1.27।।**

श्रीहर्षमते देवस्त्रीणां निर्निमेषत्वं नलदर्शनजनितं यद्यस्ति तर्हि दमयन्त्याः चेतसि तद्विषयिणी बीभत्सभावगर्भिता निन्दादृष्टिः कथमुत्पद्यते मन्मथे। निर्निमेषत्वं देवस्त्रीषु स्वाभाविकं जन्मना यथास्ति प्रतिष्ठितं तथैव देवेष्वप्यत्र न सन्दिहानाः दृश्यन्ते सहृदयाः। येषां देवानां स्त्रीषु निर्निमेषत्वं नलस्यापूर्वसौन्दर्यदर्शनोद्भूतं कविना परिकल्प्यते तेष्वेव सौन्दर्याधिपतित्वेन प्रतिष्ठितस्य मन्मथस्य निर्निमेषत्वं महते दोषाय कथं नातिदूरं तेनैव कविना प्रतिष्ठाप्यते स्वकवितायाम्। देवस्त्रीषु निर्निमेषत्व-विषयिणी नलदर्शनोत्पन्ना गुणदृष्टिः देवेषु तद्विषयिणी दोषदृष्टिरभिव्यक्तिदोषं प्रकटयति कवितायां महाकवेः।



कविरसावत्र नलस्य कामदेवादप्यधिकं सौन्दर्यमुपवर्णयन् कथयति–

**महीभृतस्तस्य च मन्मथश्रिया निजस्य चित्तस्य च तं प्रतीच्छया।**

**द्विधा नृपे तत्र जगत्त्रयीभुवां नतभ्रुवां मन्मथविभ्रमोऽभवत्।।1.26।।**

'कामस्य विशिष्टो भ्रमः कामजनितो विलासश्च' इत्थं द्विप्रकारकः मन्मथविषयकः भ्रमः समुत्पद्यते त्रिष्वपि लोकेषु विद्यमानासु स्त्रीषु निषधाधिपे मन्मनथश्रीसदृशीं शोभां पश्यन्तीषु। पद्येऽस्मिन् मन्मथेन सह नलस्य सादृश्यस्थापनेन भ्रमोत्पत्तिर्भवति सर्वास्वपि स्त्रीषु। प्रमाणीभवत्यत्र मन्मथेन सह स्वरूपसाम्यं नलस्य तेन च उभयोरपि स समसौन्दर्यान्वितत्वात् समशीर्षकया स्थितिरपि।

नलसौन्दर्येणाभिभूतासु त्रिभुवनवर्त्तिनीषु स्त्रीजनेषु पतिव्रतानामपि परिगणितत्वात् मन्मथविभ्रमोत्पत्तिविषयिणी उक्तिरियमनौचित्यार्थगर्भिता प्रतीयते। टीकाकारः नारायणोऽत्र समाधत्ते एवम्–'**चौ परस्परसमुच्चये जगत्त्रयीभुवामिति सामान्येनोक्ते पतिव्रतादिरहितानामिति ज्ञेयम्। एवं 'न का निशि स्वप्नगतं ददर्श तम्' इत्यादावपि ज्ञेयम्। यद्वा मन्मथश्रियैव इति चमत्कारार्थं व्याख्याय द्वितीयं समुच्चयार्थं व्याख्याय पतिव्रतानां मन्मथोऽयमिति निरभिलाषो विशिष्टो भ्रमः जातः। अन्यासां तु तं प्रतीच्छयापीति द्वैविध्यमित्यनौचिती परिहरणीया 'विभ्रमो भ्रान्तिहावयोः' इति विश्वः।**'

समाधानमेतत् सहृदयानां हृदि नावतरति। पतिव्रतानामपि जगत्त्रय्यां जातासु स्त्रीषु विद्यमानत्वात् तासां हृदि नलं दृष्ट्वा कथमुत्पद्यते तद्विषयकः निरभिलाषो कामभ्रमः इति टीकाकर्तुः विचारस्तर्कपदवीं नाधिरोहति। पतिव्रतासु निरभिलाषत्वपरिकल्पनेन कविना पद्येऽस्मिन् स्वयमेवोवर्णितं विभ्रमस्य द्वैधीभावं च संघटते। प्रथमं निरभिलाषो नलविषयको भ्रमः सर्वास्वपि समुत्पद्यते पुनः सर्वास्वपि तदाश्रित्य शृङ्गारपूर्णा विलासोत्पत्तिर्जायते इत्येवमप्यत्रार्थावगतिः सहृदयहृदयेष्वतरन्ती दृश्यते। नलस्वरूपदर्शनानन्तरं तद्विषये पतिव्रतानां निरभिलाषत्वमपतिव्रतानां साभिलाषत्वं टीकाकारेण यन्निर्धारितं तदप्यनुचितं 'जगत्त्रयीभुवां नतभ्रुवाम्' इत्यनेन कविना स्वयमेव प्रतिपादितेन वचनेन सर्वासां स्त्रीणां नलसौन्दर्यप्रभावाक्रान्तत्वेन स्वीकारात्।

नतभ्रूपदप्रयोगः अमुमेवार्थं समर्थयति यतो हि पदस्यास्य प्रयोगेण लज्जातिशयान्वितता अभिव्यज्यते सर्वास्वपि त्रिभुवनव्यापिनीषु स्त्रीपदवाच्यासु। पतिव्रतासु स्त्रीषु पुनः लज्जातिशयान्वितता प्राधान्यं बिभर्ति अत एव

नलसौन्दर्याभिभूतत्वेन तासां प्राधान्येन परिगणनमत्र स्वत एवाभिव्यज्यते न च समाधीयते एतत् समाधानेन केनापि टीकाकृद्भिः प्रदत्तेन।

स्त्रीधर्मसामान्येनाञ्चितत्वात् पूर्वं सर्वास्वपि निरभिलाषस्य नलविषयकस्य भ्रमस्योत्पत्तिस्तदनन्तरमपतिव्रतासु तद्विषयकस्य साभिलाषस्य एव विलासस्योत्पत्तिरित्यपि परिकल्पितुमत्र शक्यते। एतदपि न संभवति यतो हि कामाभिलाषस्य सर्वास्वपि सामान्येन स्वभावत एव विद्यमानत्वान्न कर्तुं शक्यते अस्माभिः निरभिलाषरूपकोऽत्र भ्रमोत्पत्तिविषयकः भेदः क्वचिदपि। अत एव नले कामदेवस्य भ्रमोत्पत्तिः स्वयमेव साभिलाषत्वं प्रकाशयति सर्वासामेव स्त्रीणामित्यत्र प्रमाणी भवति। पतिव्रताः स्वभर्तृषु नलरूपिणं कामं पश्यन्ती स्थिता इत्यनेनार्थेन नलस्य अनितरसाधारणं सौन्दर्यं व्यतिरेकमुखेन निम्नत्वं भजते, नास्त्येतच्च प्रतिपाद्यं सम्पूर्णस्याप्यस्य पद्यस्य।

दमयन्त्या तिरस्कृतः असावेव कामः अन्यत्र नलेन देहकान्त्या विनिर्जितोऽपि तमेव पराजेतुं यतमानः संदृश्यते। प्रथमसर्गस्यास्य अन्यस्मिन् पद्ये कविरसौ नलसौन्दर्येण पराजितममुं कामदेवं प्रावेशयन् मनसि विदर्भजायाः दमयन्त्या एवं युवावस्थया-

**यथोह्यमानः खलु भोगभोजिना प्रसह्य वैरोचनिजस्य पत्तनम्।**

**विदर्भजाया मदनस्तथा मनोऽनलावरुद्धं वयसैव वेशितः।।1.32।।**

दमयन्त्या मनः नलदर्शनाभिलाषाक्रान्तं वर्तते। तत्र युवावस्थया प्रसह्य मदनः वेशितः। चित्रादौ दृष्टं श्रुतं वा नलं मनसि निधाय दमयन्ती पूर्वमेव कामपीडिता सञ्जाताऽस्ति। पद्येऽस्मिन् कामप्रभावेणैव दमयन्तीमावेष्टयति नलविषयिणी काऽपि विशिष्टेच्छा। कामोऽत्र प्रभवति दमयन्तीमाक्रान्तुं स्वप्रभावात् स्पष्टमेव, यं सैषा दमयन्ती सर्गस्यास्य पूर्वस्मिन् पद्ये परागतासुत्वेन निन्दयति स्वभावसिद्धनिर्निमेषत्वान्वितत्वादपि '**स्मरात्परासोरनिमेषलोचनादि**'त्येवं (1.36) प्रकारेण। कवितायामेकत्र दमयन्त्या मनसि स्वप्रभावस्य वृद्धये कामस्य विशिष्टोऽसौ यत्नः अन्यत्र पुनः दमयन्त्याः कामविषयिणी अत्यन्तं तिरस्कारपूर्णा दृष्टिरित्थम् एकस्मिन्नेव प्रसङ्गे पृथक्तया विनिवेशिताप्युभावप्यर्थौ क्वचिदपि प्रतिष्ठां न लभेते औचित्यान्वेषणसमर्थानां सहृदयानां हृदये। यः कामदेवः एवं तिरस्कृतोऽस्ति सः कथं सामर्थ्यं भजते तस्य तिरस्कर्त्र्याः मनसि यौवनमवलम्ब्य स्वप्रतिष्ठायास्तस्या च पुनः तन्मनसि नलाकर्षणरूपस्य प्रयोजनस्य सिद्धेः।



नलः संतप्तोऽस्ति स्मरेण शरीरशोभाजयजातमत्सरभावग्रस्तेन। नलात् पराजितः कामदेवोऽसौ दमयन्त्या नलं विनिर्जेतुमियेष एवम्-

**तमेव लब्ध्वावसरे ततः स्मरः शरीरशोभाजयजातमत्सरः।**

**अमोघशक्त्या निजयेव मूर्तया तया विनिर्जेतुमियेष नैषधम्।।1.43।।**

यया दमयन्त्या कामदेवः तिरस्कृतोऽस्ति तामेव दमयन्तीमसौ अमोघशक्तित्वेन परिकल्पयत्यत्र स्वशत्रुं निषधाधिपतिं विनिर्जेतुम्। एवञ्च नलस्य धैर्यकञ्चुकं स्वशरप्रहारेण ध्वंसयितुं दमयन्त्याः गुणानां नलश्रवणकालमेवासौ कामः उचितं मनुते अन्यत्र एतदनन्तरमेव एवम्-

**अकारि तेन श्रवणातिथिर्गुणः क्षमाभुजा भीमनृपात्मजाश्रयः।**

**तदुच्चधैर्यव्ययसंहितेषुणा स्मरेण च स्वात्मशरासनाश्रयः।।1.44।।**

अतः परं महाकविना काव्यलिङ्गमुखेन परिकल्पिता अन्यस्मिन् पद्ये अनौचित्यार्थगर्भिता उक्तिः पुनः सहृदयहृदयेषु नावतरति यत्र विधाताऽपि साहाय्यं विदधाति कामदेवस्य नलधैर्यकञ्चुकविनाशकर्मणि। विधात्रा विहितसाहाय्यस्य कामस्य त्रिलोकीविजितार्जितानि यशांसि कथं कविना एवं संशये निमज्जितानि इति नावगन्तुं शक्यते-

**अमुष्य धीरस्य जयाय साहसी तदा खलु ज्यां विशिखैस्सनाथयन्।**

**निमज्जयामास यशांसि संशये स्मरस्त्रिलोकीविजयार्जितान्यपि।।1.45।।**

**अनेन भैमीं घटयिष्यतस्तथा विधेरवन्ध्येच्छतया व्यलासि तत्।**

**अभेदि तत्तादृगनङ्गमार्गणैर्यदस्य पौष्पैरपि धैर्यकञ्चुकम्।।1.46।।**

पूर्वं कामयशसः संशये निमज्जनं तदनन्तरं तद्रक्षणाय विधेरवन्ध्येच्छायारुदयः इति पौर्वापर्यमत्र कथायाः न विरोधाय कल्पते इति यद्युच्यते तर्हि नलं जेतुं प्रवृत्तस्य कामदेवस्य यशसः संशये निमग्नान्तरमुत्पत्तिर्भवति तद्रक्षणविषयिण्याः विधातुरिच्छायाः। अर्थोऽयमत्र अनौचित्यं समाधातुमसमर्थ एव प्रतिभाति प्रतिपुरुषविषयिण्याः विधातुरिच्छायाः सर्वत्र विद्यमानत्वादाजन्मनः अपूर्वाश्रितत्वेन निर्धारितत्वाच्च। कामस्य नलविजयित्वं नलस्य च कामाक्रान्तत्वं पूर्वमेवासीन्निश्चितं विधात्रा, अत एव कामदेवस्य विधात्रा समर्थितानि त्रैलोक्यविजयीनि यशांसि कथं पूर्वं सन्देहास्पदतां भजन्ते इति सहृदयाः नावगन्तुं शक्नुवन्त्यत्र।

एवञ्च **'स्मरोपतप्तोऽपि भृशं न स प्रभुः'** (1.50) इत्यत्र स्मरेण भृशं परितप्तस्य नलस्य अयाचितव्रतप्रकाशनम्, **'असंवरे शंवरवैरिविक्रमे'** (1.53) इत्यत्र कामप्रभावस्य नलस्य चेतसि उत्पत्तेरपरिहार्यतायाः प्रकाशनम्, **'अनङ्गचिह्नं स विना शशाक नो यदासितुं संसदि यत्नवानपि।'** (1.55) इत्यत्र कामप्रभावेण अपहृतधैर्यस्य निषधाधिपतेः स्वराजसभायां अनवस्थितेः प्रकाशनञ्च कविना भृशमुपवर्णितमस्ति। सर्वेष्वप्येतेषु कामास्त्रपरितापितस्य नलस्य स्वरूपवर्णनविषयकेषु पद्येषु दरीदृश्यते नायिकया तिरस्कृतस्य नायकेन पराजितस्यापि कामस्य प्रभावातिशयः विरहव्यथाजनितम्लानाञ्चिते निषधाधिपस्य हृदये। शत्रुः स्वानुकूल्यं विदधाति स्ववैरिणं ध्वंसयितुं न पुनः आनुकूल्यं तमभीष्टसिद्धिमन्तं विधातुम्। दमयन्त्याः हृदि कामस्य यत्नातिशयप्रभावात् नलविषयकानुरागस्योत्पत्तिः नलस्य च हृदि दमयन्तीमवलम्ब्य जायमानः अनुरागातिशयः उभयत्रापि प्रीतिजनकत्वेन सहृदयानाह्लादयति। न प्रतीयते अत्र मनागपि विरोधः कामस्य तत्सौन्दर्यतिरस्कर्तृविषयकः।

श्रीहर्षस्य कवितायां असाधारणसामर्थ्यान्वितस्य कामदेवस्य एकत्र दरिद्रान्विता अन्यत्र च अपरिमितसामर्थ्यसम्पन्नता नायकनायिकयोः पूर्वानुरागवर्णनप्रसङ्गे अनौचित्यं पुष्णाति सहृदयचञ्चरीकाणां हृदि। नलदमयन्त्योः पूर्वानुरागोत्पत्तौ काम एव सर्वत्रैव प्रभविष्णुतां भजते विधात्रा विहितसाहाय्यः। तत्सामर्थ्यातिशयप्रकाशनप्रसङ्गे कविना पूर्वमुपनिबद्धानि तद्विषयकाणि तिरस्कृतिवचनानि अर्थौचित्यनिबन्धने विप्रतीपायन्ते।

न केवलं कामदेवस्य विषये कविरसौ तिरस्कारपूर्णानि वचांसि प्रयुङ्क्ते अपितु प्रथम एव सर्गे जगत्पितुर्ब्रह्मणः स्वरूपं बीभत्सं चकार तस्मिन् कामदेवस्य प्रभावातिरेकं प्रदर्श्य एवम्–

**किमन्यदद्यापि यदस्त्रतापितः पितामहो वारिजमाश्रययहो।**
**स्मरं तनुच्छायतया तमात्मनः शशाक शङ्के स न लंघितुं नलः।।1.47।।**

यः पितामहः कामदेवस्य शक्तिं विवर्धयति नलस्य धैर्यकञ्चुकच्छेदनाय स एव कामदेवेन कथमाक्रान्तोऽस्ति स्वसन्तापातिशयशमनाय वारिजमावलम्बमानः संदृश्यते चेत्यनौचित्यार्थान्विता उक्तिः नावतरति हृदि सचेतसाम्। यदि जगत्स्रष्टा कामदेवेन आक्रान्तोऽस्ति तर्हि सोऽसौ नलस्य स्थैर्यविनाशाय प्रवृत्तस्य स्वशत्रोः कामदेवस्य शक्तिविवर्धनकर्मणि कथं प्रवृत्त इति प्रतीतिपथं नावतरति सहृदयानाम्।

ब्रह्मणः कामाक्रान्ततायाः वर्णनमनुचितार्थपूर्णमस्ति समेषामेव सहृदयानां कृते। देवस्यास्य सर्वदेवपितामहरूपेण प्रतिष्ठितत्वात् तस्य स्वरूपस्य औचित्यमवश्यमेव



रक्षितव्यं महाकविना स्वकवितायाम्। नलस्योत्कर्षविधानकर्मणि प्रवृत्तोऽसौ कविः सर्वथा अनौचित्यार्थपूर्णां सरणिमनुसरति ब्रह्मणः स्वरूपवर्णनविषये। अचिन्त्यनिमित्ता विशेषोक्तिरत्र यदि समाधानतया उपस्थाप्यते ब्रह्मणि कामदेवस्य प्रभावातिशयवर्णनप्रसङ्गे तर्हि यत्किञ्चिदौचित्यमवतरति कवितायां सहृदयानां मनःसु कवेरभिप्रायस्य प्रतिष्ठापनसाधकम्।

द्वितीयसर्गस्य आदावेव हंसमुखेन दमयन्त्याः सौन्दर्यमुपवर्णयति महाकविरसौ पद्येष्वनेकेषु। मकरध्वजः यौवनञ्च उभावपि दमयन्त्याः देहयष्टौ दृश्येते प्रसरन्तौ। अगाधतां प्रापिते तत्सौन्दर्यस्योदधौ मज्जयन्त्योर्द्वयोरप्यनयोरुद्धरणाय कविरसावुत्प्रेक्षयत्यत्र तस्याः कुचद्वयं प्लवकुम्भाविव एवम्–

**अपि तद्वपुषि प्रसर्पतोर्गमिते कान्तिक्षरैरगाधताम्।**
**स्मरयौवनयोः खलु द्वयोः प्लवकुम्भौ भवतः कुचावुभौ।।2.31।।**

अस्मिन्नेव क्रमे महाकविरसौ पुनरप्युत्प्रेक्षयति यद् दमयन्त्याः कुम्भच्छोभमानौ द्वावपि कुचौ लावण्यसरसि, कुम्भनिर्माणे हेतुभूतस्य दण्डस्य भ्रमकारितागुणं धारयन्त्यौ दृश्येते। तद्यथा–

**कलसे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः।**
**स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रममातनोति नः।।2.32।।**

पद्येऽस्मिन् महाकविरसौ 'निजहेतुदण्डजः' इति पदं प्रयुङ्क्ते दमयन्त्याः कुचयोः घटनिमित्तभूतस्य दण्डस्य चक्रभ्रमकारितागुणं प्रदर्शयितुम्। हेतुपदस्य प्रयोगोऽत्र निमित्तोपादानोभयकारणयोर्वाचकतां प्रतिपद्यते। घटसदृशयोः कुचयोः संक्रामति घटनिमित्तकारणभूतस्य दण्डस्यैव चक्रकारितारूपः गुणः न पुनस्तदुपादानभूतस्य हेतुत्वेनात्र उपात्तस्य मृत्तिकारूपस्य पदार्थान्तरस्यापि गुणाः तत्र संक्रामिता दृश्यन्ते। अत एव हेतुपदस्थाने निमित्तपदप्रयोगोऽत्र समीचीनः प्रतिभाति 'स्वनिमित्तदण्डज' इत्येवंप्रकारकः। निमित्तपदप्रयोगात् उपादानभूतस्य कारणस्य स्वत एव निराकरणं भवति अर्थौचित्यस्य निदानमप्युपर्युक्तस्य कर्तुं शक्यते।

दण्डपदस्य अनन्तरप्रयोगात् पूर्वप्रयुक्तस्य हेतुपदस्य निमित्तमात्रवाचकत्वमवगम्यते अतः नास्त्यत्र अर्थप्रतीतौ कोऽपि दोषः इति यद्युच्यते तर्हि हेतुपदस्य पूर्वप्रयोगात् प्रतीतिपथमायाति प्रथमं समेषामेव हेतुपदवाच्यार्थः निमित्तोपादानभूतहेतुद्वयसंगतः। तेन च पूर्वप्रयुक्तस्य हेतुपदस्य निमित्तोपादानत्वनियामकस्य दण्डपदस्य अनन्तरोपात्तत्वेन क्रमदोषः क्वचिदायात्यत्र प्रतीतिपथम्।

इत्थं समुपलभन्ते अनेकानि अनौचित्यार्थप्रकाशकानि वचनानि श्रीहर्षस्य कवितायां येषां समाधानमन्वेष्टुं यतन्ते सामाजिकाः। कविकर्मणि नियतिकृतनियमराहित्यमाचार्यैः परिकल्प्यते सर्वत्र रसपरिपूर्णानुभूतिजनितस्य सहृदयहृदयाह्लादस्य समुत्पत्तये। स्वकाव्यास्वादनतत्पराणां सामाजिकानां हृदयेषु चमत्कारातिशयं जनयितुं प्रवृत्तोऽसौ महाकविः नियतिकृतनियमानाम् अपरिगणनेन सह प्रायशः लौकिकान् व्यवहारानपि न परिगणयति क्वचिदिति विवेचनेनानेन स्पष्टं प्रतिभाति। सम्पूर्णायामपि संस्कृतकाव्यपरम्परायाम् अनितरसाधारणशक्तिसम्पन्नस्य महाकवेः श्रीहर्षस्य कविता सर्वशास्त्रमहोदधेः सारं प्रतिपदं प्रकाशयन्ती सर्वातिशायिनी वर्तते पदप्रयोगसामर्थ्यदृशा उत्प्रेक्षागर्भितार्थप्रकाशनदृशा च इत्यस्मिन् विषये सहृदयैः सह समालोचका अपि कथमपि सन्दिहाना न दृश्यन्ते।

❖

## सन्दर्भाः


1. नैषधीयचरितम्, श्रीमन्नारायणविरचितया नैषधीयप्रकाशाख्यया व्याख्यया, मल्लिनाथ-विद्याधर-जिनराजादिव्याख्यान्तरीयटिप्पण्यादिभिश्च समुल्लसितम्, प्रथमं संस्करणम्, श्रीमन्नारायणराम आचार्य 'काव्यतीर्थ' इत्यनेन परिशिष्टादिभिः समलंकृत्य संशोधितम्, प्रकाशकम्- उत्तरप्रदेशसंस्कृतसंस्थानम्, नया हैदराबाद, लखनऊ-226007, ई.1998

2. अनन्यसंश्रयाः - मल्लिनाथः। अनन्यविश्रमाः-नारायणः।


❖



# भारतीयः वाक्यसिद्धान्तः - एकमनुशीलनम्


**बनमाली बिश्वालः**


भाषिक-संरचनामधिकृत्य विचारप्रसङ्गे सर्वप्रथमं वाक्य-संरचनाविषये विचारः आवश्यकः प्रतिभाति। यतोहि अस्माकं विचारशैल्यां वैविध्यं वाक्यमाध्यमेनैव प्रकटीभवति। यद्यपि ह्विटनेसदृशाः केचन भाषावैज्ञानिकाः तथ्येनैतेन सहमताः न सन्ति यद् 'वाक्यैरेव सम्भाषणस्य प्रारम्भः स्वीकर्तव्यः' इति, किन्तु आधुनिकैर्गवेषकैरनुसन्धानपूर्वकमेतत् प्रमाणीकृतं वर्तते यद् भाषायाः प्रारम्भिकदशायां वाक्यानाम् अथवा वाक्यान्तर्गतानां शब्दानामेव प्रयोगः क्रियते। बालानां भाषा-शिक्षण-प्रवृत्तौ तत्सम्बद्धप्रविधौ वा यदि दत्तावधानाः भवेमः तर्हि वयं द्रष्टुं शक्नुमः यत्ते सर्वप्रथमं वाक्यान्येव अभ्यस्यन्ति, प्रयुञ्जते च। वस्तुतस्ते वाक्यैरेव चिन्तयन्ति तथा अवगछन्ति अपि। एवं क्रमशस्तेषां पदज्ञानं शब्दज्ञानञ्च वाक्यमाध्यमेनैव भवति।

यद्यपि वाक्यानां विभिन्नाः अवयवाः सम्भवन्ति तथापि सम्पूर्ण-विचाराणां वाहकं वाचकं वा अखण्डं वाक्यमेवास्ति। अर्थदृष्ट्या यद् वाक्यमस्ति रूप-दृष्ट्या सः ध्वनीनां समूह एव वर्तते। क्रमशः वाक्यावयवानां विकासः अभवत् तथा शब्दैः वाक्यविश्लेषणं च समभवत्। अत एव वाक्यानां, शब्दानाञ्च स्वतन्त्र-सत्ता सर्वैः स्वीकृता वर्तते।

एतया पूर्वपीठिकया एतत् स्पष्टीभवति यद् भाषायाः प्रयोगदशायां वाक्यानां प्राधान्येन महत्त्वं वरिवर्ति। यतोहि वाक्यैः विना भाषायाः प्रयोगः, सम्भाषणं वा न सम्भवति। निर्वचनाधारेण भाषा-वाक्ययोः अर्थसाम्यमपि द्रष्टुं शक्यते। भाषायाः व्युत्पत्तिः-भाष्यते इति भाषा (भाष्अअक्अटाप्) इत्येवं क्रियते तथा वाक्यस्य च व्युत्पत्तिः-उच्यते इति वाक्यम् (वच् अ ण्यत्) इति भवति।

वस्तुतः वाक्यमयमिदं व्यवहारजगत्। शब्दाभिव्यक्तेऽस्मिन् लोके अभिप्राय-सङ्क्रमणार्थं वाक्यानां महत्त्वपूर्णा भूमिका स्वीकर्तव्या एव। वाक्यान्येव अर्थविधायकानि

भवन्ति। तानि च शब्दान् विना कल्पयितुं न शक्यन्ते. शब्दाश्च वर्णैर्विना न सम्भवन्ति।. अत एव योगशिखोपनिषदि उल्लिखितं वर्तते-

**अकारादिक्षकारान्तान्यक्षराणि समीरयेत्।**

**अक्षरेभ्यो पदानि स्युः पदेभ्यो वाक्यसम्भवः।।[1]**

अपरं च भर्तृहरिणा अपि वर्ण-पद-वाक्येषु न तथा कश्चन भेदः प्रकल्पितः। यतोहि तेनोक्तम्-

**पदे न वर्णाः विद्यन्ते वर्णेष्ववयवाः न च।**

**वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन।।[2]**

पातञ्जल-योगसूत्राधारेण पातञ्जलाः योगिनः अपि प्रतिपादयन्ति यत् श्रूयमाणा एव वर्णाः वाक्य-शब्देन व्यवह्रीयन्ते इति। वैयाकरणेषु प्राचीनाश्च अभिप्रयन्ति यद्--वर्णमालायां प्रत्येकं पदमेकं वाक्यं भवतीति प्रतीतिरस्ति। अतः वाक्यविचारप्रसङ्गे वाचः तथा तदङ्गभूतयोः वर्ण-शब्दयोश्च चर्चा अप्रासङ्गिकी न वर्तते।

शब्दस्य महत्त्वमाचार्यैः बहुधा प्रतिपादितं वर्तते। संसारे यदि शब्दाख्यं ज्योतिर्नाभविष्यत् तर्हि भुवनत्रयं नूनं तमसावृत्तमभविष्यदिति काव्यादर्शे दण्डिनोद्घोषितम्-

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।[3]**

ज्ञानं नाम प्रकाशरूपम्, अज्ञानञ्च अन्धकाररूपम्। संसारे एवं न किञ्चिज्ज्ञानं वर्तते यद् शब्दं विना व्यक्तं भवितुमर्हति। एतदेव वाक्यपदीये भर्तृहरिणा सुष्ठु प्रतिपादितं वर्तते-

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।[4]**

उपर्युक्तानां वर्ण-शब्द-वाक्य-तत्त्वानामनुशासनं व्याकरणमेव सम्पादयति। वस्तुतः शब्दरूपेण व्याकरणं सर्वविधस्यापि प्रयोगस्य अनुशासनं करोति। अत एव 'शब्दानुशासन'मिति व्याकरणस्य नामान्तरं प्रसिद्ध्यति।' तदस्य तदस्मिन् स्यादि'ति पाणिनिसूत्रस्य[5] व्याख्यानप्रसङ्गे कैयटः प्रतिपादयति यद् 'यत्रार्थे लोकाः शब्दान् प्रयुञ्जते तदर्थाभिधायिन एव शास्त्रेणानुविधीयन्ते प्रयोगमूलत्वाद् व्याकरणस्मृतेः'[6] इति। 'महान् हि शब्दस्य प्रयोगविषयः'[7] इति वदता पतञ्जलिना शब्दस्य व्यापकत्वमपि प्रतिपादितम्। वाक्यपदीये भर्तृहरिः शब्दस्य ज्ञानमयत्वं प्रतिपादयति। वस्तुतः ज्ञानस्यैव



शब्दरूपेण परिणामो भवति। शब्दश्च आनन्दरूपः स्वीकृतः आत्यन्तिकसुखदत्वात्, स्वर्गफलदत्त्वाच्च। अत एव पतञ्जलिना महाभाष्ये प्रोक्तं-एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति[8] इति। अपरञ्च 'यः शास्त्रपूर्वकं शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते, अथवा पुनरस्तु ज्ञाने एव धर्मः'[9] इत्यादि महाभाष्यवचनान्यपि शब्दस्य ब्रह्मत्व-पक्षं समर्थयन्ति। परम्परया शब्दमयस्य वाक्यस्यापि महत्त्वमेतेन सिद्ध्यत्येव।

## वर्ण-शब्द-वाक्यात्मिकायाः वाचः दार्शनिकं विवेचनम्

लोके यद्यपि भर्तृहरेः शब्दब्रह्मसिद्धान्तः प्रसिद्धो वर्तते किन्तु एतस्य सिद्धान्तस्य बीजमुपनिषत्सु द्रष्टुं शक्यते। मैत्रेयोपनिषदि उक्तमस्ति-

**द्वे ब्रह्मणी वेदितव्ये शब्द-ब्रह्म परं च यत्।**

**शब्द-ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।।[10]**

वैयाकरणैः न केवलं वाचः किन्तु पृथग्रूपेण वर्ण-शब्द-वाक्यानामपि तुलना ब्रह्मणा क्रियते एव। वाग्ब्रह्मणा सह अक्षरब्रह्मशब्दब्रह्मसदृशाः सिद्धान्ताः भारतीयपरम्परायां सर्वथा प्रसिद्ध्यन्ति।

**वाग्-ब्रह्म**-एवमेव वागपि वेदेषु उपनिषत्सु च ब्रह्मत्वेन निगद्यते। अत्रास्माभिः विशिष्य वाग्ब्रह्मण एव चर्चा क्रियते। वस्तुतोऽस्मत्परम्परायां वाचः जगत्कर्तृत्वं प्रसिद्धम्। 'वागेव विश्वा भुवनानि जज्ञे', 'वाग्घि प्रजापतिः'[11], 'वाग्वै प्रजापतिः'[12], 'प्रजापतिर्वै वाक्पतिः'[13] इत्यादीनि ब्राह्मण-वाक्यानि च तत्र प्रमाणभूतानि सन्ति। अपरं च प्रजापतिर्हि वाक्[14] इत्यपरं वचनमपि तथ्यमेतत् समर्थयति।

वस्तुतो वागपि शब्दरूपाऽस्ति। अत एवानेकत्र सा ब्रह्मरूपेण वर्णिता वर्तते। तद्यथा 'वाग् वै ब्रह्म' इति वचनम् ऐतरेयब्राह्मणे[15], शतपथब्राह्मणे[16], वृहदारण्यकोपनिषदि[17] चोपलभ्यते। 'वाग्ब्रह्म'[18], 'वाग्घि ब्रह्म'[19], 'वागिति तद् ब्रह्म'[20] इत्येतानि यानि वचनान्तराण्युपलभ्यन्ते तान्यपि वाचः ब्रह्मत्वं प्रतिपादयन्ति। 'ते मृत्युमतिवर्तन्ते ये वै वाचमुपासते'[21] इति छान्दोग्योपनिषद्वचनमपि वाचः ब्रह्मणा सादृश्यं साधयति। एवं वाचः ब्रह्मत्वे शब्दस्यापि ब्रह्मत्वमुपपन्नम्।

शब्दतत्त्वस्य चर्चाप्रसङ्गे वाचः परा-पश्यन्ती-मध्यमा-वैखरी-रूपाः प्रसिद्धाश्चतस्रोऽवस्थाः विवेचनीयाः सन्ति। परा वाक् शब्दब्रह्मरूपा मूलाधारे (कुण्डलिन्यां) वर्तते, पश्यन्ती च नाभिप्रदेशे संस्थिता शोभते। मध्यमा हृदि तिष्ठति। एवं च वैखरी

कण्ठदेशे वर्तते इति परमलघुमञ्जूषायां स्फोटनिरूपणप्रसङ्गे नागेशः प्रतिपादयति। प्रसङ्गेऽस्मिन् सः अधोलिखितां कारिकामुद्धरति–

**परा वाङ्मूलकचक्रस्था पश्यन्ती नाभिसंस्थिता।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।।**

आसु चतसृषु वाक्षु वैखरी व्यवहारयोग्या भवतीति ज्ञापयितुं सः वदति–

**वैखर्या हि कृतो नादः परश्रवणगोचरः।**
**मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते।।**

अर्थात् यद्यपि मध्यमा–वैखरीभ्यामुभाभ्यां नादः क्रियते तत्र फले भेदः दृश्यते। अनयोर्मध्यमा–नादः स्फोटरूपशब्दस्य व्यञ्जकः, वैखरी–नादश्च सर्वेषां श्रावणप्रत्यक्ष-विषयो भवति। वस्तुतः परा, पश्यन्ती, मध्यमेति त्रय्यः वाचः सूक्ष्मरूपाः भवन्ति याः गुहायां निहिताः नेङ्गयन्ति, न चेष्टन्ते न वा निमिषन्ति। अतः वैखरीवाचमेव मनुष्या वदन्ति। एतत्प्रसङ्गे ऋग्वेदस्य कश्चन मन्त्रः महाभाष्यस्य पस्पशाह्निकेऽपि उद्धृतोऽस्ति–

**चत्वारि वाक् परिमिता पदानि तानि विदुर्मनीषिणः।**
**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।।**[22]

परा वाक् वर्णादिविशेषरहिता चेतनमिश्रा सृष्ट्युपयोगिनी जगदुपादानभूता कुण्डलिनी-रूपेण प्राणिनां मूलाधारे वर्तते। सा च कुण्डलिन्याः प्राणवायुसंयोगे व्यज्यते। वाक्षु केवलमियमेव निःष्पन्दा वर्तते। अन्याः पश्यन्त्यादयश्च सस्पन्दाः सन्ति, याः एतस्याः विवर्तरूपाः सन्ति। इयमेव परा वाक् 'सूक्ष्मस्फोट' इत्युच्यते। अत एव भर्तृहरिणा व्याकरणस्य त्रिविधवाग्विषयत्वं प्रतिपादितम्–

**वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।**
**अनेकतीर्थभेदस्य त्रय्यः वाचः परं विदुः।।**[23]

वस्तुतः एतासां चतसृणां वाचां क्वचिद् व्याकृताव्याकृतेति भेदद्वयेन वर्गीकरणं दृश्यते। व्याकृतेति शब्देन पश्यन्त्यादित्रय्याः, अव्याकृतेति शब्देन च शक्ति–शक्तिमदादि-भेदशून्यायाः परावाचः व्यवहारः। एवमेव महाभारतेऽपि वाक्यपूर्विकायाः सृष्टेः विषये चर्चा समुपलभ्यते–

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।**[24]



उपर्युक्तायां कारिकायां वाक्–पदेन पश्यन्ती एव ग्राह्या। वस्तुतः तस्याः एव ओंकारो, वेदः, शब्दब्रह्म चेत्यादीनि नामान्तराणि प्रसिद्ध्यन्ति।

**अक्षरब्रह्म**–महाभाष्ये वर्णसमाम्नायः ब्रह्मत्वेन वर्णितः। अक्षरसमाम्नाय-वर्णन–प्रसङ्गे पतञ्जलिः प्रतिपादयति–'सोऽयम् अक्षरसमाम्नायः वाक्समाम्नायः, पुष्पितः फलितश्चन्द्रतारकावत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्य-फलावाप्तिश्चास्य ज्ञाने भवति मातापितरौ चास्य स्वर्गे लोके महीयेते'[25] इति। 'ओमित्येकाक्षरं ब्रह्म' इत्यत्र प्रणवः शब्दब्रह्मरूपेण वर्णितो वर्तते। सूतसंहितायां प्रणवः परापरभेदेन द्विविधः कल्पितो वर्तते–'परः ब्रह्मात्मकः, अपरश्च शब्दात्मकः।' एषोऽक्षरशब्दः शब्दतत्त्वेन स्फोटात्मना स्फोटनाम्ना वा व्याकरणशास्त्रे सिद्धिपथमागतः।

**शब्दब्रह्म**–वैयाकरणेषु पतञ्जलिः शब्दब्रह्मविषये स्पष्टमुल्लिखति। सोऽपि प्रसङ्गेऽस्मिन् साङ्केतिकं वैदिकमभिमतं पल्लवयति। ऋग्वेदादुद्धृतस्य 'चत्वारि शृङ्गा' इत्यादिमन्त्रस्य व्याख्यानावसरे महाभाष्यस्य टीकाकारैः उक्तम् महान् उ परब्रह्मस्वरूपः, देवोऽन्तर्यामिरूपः, साम्यं सायुज्यमिति। अनन्तरं भर्तृहरिः एतदेवाभिमतं विस्तारितवान्। वाक्यपदीयस्य प्रथमे श्लोके सः शब्दब्रह्मणः अर्थरूपेण विवर्तनं दर्शयति। तस्य मतानुसारम् अनादि–निधनं सर्वग्राह्यग्राहकाकारवर्जितं तत् शब्दब्रह्म मायासहितं सत् नामरूपात्मकमिदमखिलं जगद् बुद्धौ आकलय्य स्वकालाख्यया शक्त्या तन्मात्रपदवाच्यानि आकाशादीनि उत्पादयति। वाक्यपदीये नैकेषु प्रसङ्गेषु शब्दब्रह्मविषये उल्लेखः प्राप्यते।

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रियाजगतो यतः।।**[26]

अनन्तरं नागेशादिभिः लघुमञ्जूषादिग्रन्थेषु शब्दब्रह्मणः महत्त्वविषये चर्चा कृता। मञ्जूषायां नागेशः शक्त्याश्रयप्रकरणे शब्दब्रह्मणः स्वरूपमेवं विवृणोति–प्रलयकाले माया परमात्मनि लीयते। परन्तु तस्याः आत्यन्तिको नाशो न भवति। तस्यामवस्थायां सर्वं सुप्तवत् तिष्ठति। ततः यथाकालं मायापुरुषयोः उत्पत्त्यनन्तरं बिन्दुरूपव्यक्तं त्रिगुणं शक्तिमत्त्वं च जायते यस्य अचिदंशः बीजम्, चिदचिन्मिश्रोंऽशः नादः, चिदंशश्च बिन्दुरस्ति। तस्माद् बिन्दोः अव्यक्तात्मा वर्णादिविशेषरहितः नादमात्रं रवः समुत्पन्नः, यः रवः शब्दब्रह्मेति संज्ञया निगद्यते इति।

अस्मिन् प्रसङ्गे नैयायिक–मीमांसक–वैयाकरणाभिमत–शब्दस्वरूपज्ञानार्थं अस्मदीयं शोधपत्रं 'वैयाकरणाभिमतः शब्दब्रह्मसिद्धान्तः–एकं समाकलनम्'[27] परामर्ष्टुं शक्यते।

## विविधशास्त्रानुमतं वाक्यलक्षणम्

अर्थबोधजनकस्य वाक्यस्य स्वरूपविषयिणी चर्चा प्राचीनकालादेवोपलभ्यते। विभिन्नैः शास्त्रकारैः वाक्यस्य लक्षणं भिन्न-भिन्नप्रकारेण कृतम्। न केवलं वैयाकरणाः किन्तु नैयायिकाः, मीमांसकाः, आलंकारिकास्तथा अन्येऽपि।

शास्त्रकाराः स्वस्वशास्त्रदृष्ट्या वाक्यस्वरूपं विवेचितवन्तः। तेषां विचारेषु क्वचित् साम्यं वर्तते क्वचिद्वैषम्यं च परिलक्ष्यते। अत्र यद्यपि मुख्यतया वैयाकरणाभिमतं वाक्यस्वरूपं पुरस्कृत्यैव विचाराः प्रस्तूयन्ते तथापि प्रसङ्गतः अन्येषां शास्त्रकाराणां विशिष्य नैयायिक-मीमांसकानामपि केचन विचाराः संक्षिप्य प्रस्तूयन्ते।

अमरकोशकारोऽमरसिंहः वाक्यलक्षणं विधातुकामो वदति–

**सुप्तिङन्तचयो वाक्यम् क्रिया वा कारकान्विता।।**[28] इति।

कौटिल्यः अपि स्वकीये अर्थशास्त्रे वाक्यलक्षणं कुर्वन् वदति–

**पदसमूहो वाक्यमर्थसमाप्तौ शक्तम्।**[29] इति।

एताभ्यां प्राचीन-वाक्यलक्षणाभ्यां सुप्तिङन्तपदसमूहो वाक्यं भवतीति अर्थः लभ्यते।

नैयायिकाभिमतं वाक्यलक्षणम्–नैयायिकेषु गङ्गेशः स्वकीये तत्त्वचिन्तामणौ वाक्यलक्षणं प्रस्तुवन् वदति–

**वाक्यत्वं च विशिष्टार्थपरशब्दत्वम्।**

जगदीशभट्टाचार्यः शब्दशक्तिप्रकाशिकायाः स्वोपज्ञवृत्तौ वाक्यस्वरूपं प्रतिपादयन् वदति–यादृश-शब्दानां यादृशार्थविषयिताकान्वयबोधं प्रति अनुकूला परस्पराकाङ्क्षा तादृशशब्दस्तोम एव तथाविधार्थे वाक्यम्[30] इति। 'स्वार्थबोधसमाप्तः पदसमूहः वाक्यम्' इति तस्याभिमतम्।

**मीमांसकाभिमतं वाक्यलक्षणम्**–'समभिहारो वाक्यम्' इति मीमांसकाभिमतं वाक्यलक्षणं बहुधा स्वीकृतमस्ति। एतस्य एव लक्षणस्य पल्लवनं परवर्तिभिः मीमांसाचार्यैः त्रिधा कृतं दृश्यते। तद्यथा–

(क) अङ्गत्वघटकीभूतपरोद्देश्यत्व-कृति–कारकत्वान्यतर–पदार्थबोधक–पद-कल्पनानुकूलश्रुतपदसन्निधिः, स चाङ्गत्व–घटकीभूत–करणत्व–कर्मत्वान्यतरविषयक-शक्त्यजन्य–शाब्दबोधानुकूलपदसमभिव्याहारो वाक्यम्।



(ख) अङ्गत्वघटक–परस्पर–पदार्थसंसर्गवृत्ति–शक्त्यप्रयोज्य–विषयताक–शाब्द-बोधानुकूलपदसमभिव्याहारो वाक्यम् तथा

(ग) तदर्थश्चाङ्गत्वघटकीभूतं यत्करणत्वं कर्मत्वं वा तदन्यतर–विषयताको यः शक्त्यजन्य–बोधस्तदनुकूलः समभिव्याहारो वाक्यम्[31] इति। मीमांसासूत्रकारो जैमिनिः 'अवशिष्टस्तु वाक्यार्थः'[32] इति वाक्यस्वरूपं प्रतिपादयति। लोके वेदे च वाक्यार्थः समानः एव भवति इत्युपर्युक्तस्य सूत्रस्य तात्पर्यम्। मीमांसासूत्रे अन्यत्रापि जैमिनिना वाक्यस्वरूपं द्विधा प्रतिपादितमस्ति। तद् यथा–

(अ) साकाङ्क्षं त्वेकवाक्यं स्यादसमाप्तं हि पूर्वेण[33] इति तथा

(ब) समाप्तं च फले वाक्यम्[34] इति च।

वेदान्तशास्त्राभिमतं वाक्यलक्षणम्–श्रीसदानन्दः वेदान्तसारस्य महावाक्यार्थप्रकरणे वाक्यस्वरूपमेवमुपस्थापयति–

**संसर्गो वा विशिष्टो वा वाक्यार्थो नामसम्मतः।**
**अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः।।**[35]

**आलङ्कारिकाभिमतं वाक्यलक्षणम्**–विश्वनाथकविराजेन साहित्यदर्पणे वाक्यलक्षणं सुष्ठु प्रतिपादितमस्ति। तस्य मतानुसारं योग्यता–आकाङ्क्षा–आसत्तियुतः पदसमूह एव वाक्यं भवति–

**वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः।।**[36]

चन्द्रालोकस्य टीकाकारेण वैद्यनाथपायगुण्डे-महोदयेन विशिष्टैकार्थ–प्रतिपादक-निराकाङ्क्ष–पदसमूहो वाक्यम् इति वदता स्वकीयं वाक्यलक्षणं प्रस्तुतम्।[37]

**वैयाकरणाभिमतं वाक्यलक्षणम्**–एकतिङन्तार्थ–मुख्यविशेष्यक–बोधजनक-पदसमूहो वाक्यम् इति सर्वसम्मतं वैयाकरणाभिमतं वाक्यलक्षणम्। पदसंघातजं वाक्यम् इति संग्रहकारेण व्याडिना संग्रहे प्रतिपादितमासीत् किन्तु तल्लौकिकलक्षणं मन्यते। वार्तिककारः कात्यायनः एकतिङ् वाक्यम्[38] इति वार्तिकमुखेन शास्त्रीयं वाक्यलक्षणं प्रस्तौति यस्य पल्लवनं विवेचनञ्च परवर्तिनि काले पतञ्जलि–प्रभृतिभिः कृतं दृश्यते।

उपर्युक्तस्य वार्तिकस्य व्याख्यां प्रस्तुवन् भाष्यकारः पतञ्जलिः कथयति–एकतिङ् वाक्यसंज्ञं भवतीति वक्तव्यम्। आख्यातं साव्ययं सकारकं सकारकविशेषणं वाक्यसंज्ञं भवतीति वक्तव्यम्। साव्ययम् इत्येतेन सुष्ठु पचति दुष्ठु पचति, उच्चैः पठतीत्यादीनां वाक्यत्वं सिद्ध्यति। एवमेव उच्चैः पठति इत्यस्यापि। सकारकम् इति

कथनेन ओदनं पचति इत्यस्य तथा सकारकविशेषणम् इत्यनेन मृदुविशदमोहनं पचति इत्यस्य च वाक्यत्वं सिद्ध्यति।[39]

अत्र साव्यय-कारक-विशेषणमिति लक्षणानुसारं प्रत्येकं वाक्यं भवति समुदितं वा वाक्यमित्यत्र नियमो नास्ति। यद्यपि अव्ययस्यापि कारकत्वं विशेषणत्वञ्च सिद्ध्यति तथापि तस्य पृथक् प्रतिपादनं स्पष्टार्थमेव। सक्रियाविशेषणञ्च वक्तव्यमिति यत् पतञ्जलिना उक्तं तत्र प्रत्यासत्त्या कारकस्यैव यद् विशेषणं तद् गृह्यते न तु क्रियायाः। आख्यातपदेन च क्रियाप्राधान्यं लक्ष्यते। तेन 'देवदत्तेन पठितव्य' मित्यादौ वाक्यत्वं सिद्ध्यति। सविशेषणमित्यत्र साक्षात्परम्परया वा यद् विशेषणं तत्सहितमित्यर्थः बोध्यः। एवं सति 'नद्यास्तिष्ठ कूले' इत्यादौ नद्याः इत्यादेः समानवाक्यत्वं सिद्ध्यति। एतदेव लक्षीकृत्य अमरकोशे अमरसिंहेन कारकान्वित-क्रियावाचकस्य सुबन्तचयस्य, तिङन्तचयस्य अथवा उभयस्य तथा तयोः अन्यतरस्य वा वाक्यत्वं प्रतिपादितम्। कारकञ्च तिङन्तवाच्यं तदतिरिक्तवाच्यं वेति नास्ति कश्चन आग्रहः।

एतदेव एकोद्देश्यक-एकविधेयत्वगर्भम् एकवाक्यलक्षणं वाक्यपदीयकारेण भर्तृहरिणा अधोलिखितायां वाक्यपदीयकारिकायां सुष्ठु प्रतिपादितम्-

**साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम्।**
**क्रियाप्रधानं गुणवदेकार्थं वाक्यमुच्यते।।**[40]

अत्र कारिकायामुल्लिखितं वाक्यपदम् एकवाक्यबोधकम्। अत एव उद्देश्यानेकत्वे विधेयानेकत्वे च वाक्यभेदे सति अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद् विभागे स्यादिति जैमिनिसूत्रमपि संगच्छते।

वाक्यलक्षणप्रयुक्तम् आख्यातपदमधिकृत्य नागेशकैयटयोः मतानैक्यं वर्तते। कैयटस्तु आख्यातमित्यत्र एकत्वविवक्षणात् पचतिभवतीत्यादौ द्वित्वप्रसङ्गे तिङतिङः इत्यनेन सूत्रेण निघातं न अनुमनुते। उक्तं च तेन प्रदीपे-'आख्यातमिति चैकत्वं विवक्ष्यते लक्षणविधानसामर्थ्यात्। पचतिभवतीत्यादौ सत्यपि साध्य-साधनभावे आख्यातयोर्द्वित्वात् समानवाक्यत्वाभावात् निघातप्रसङ्गात्।' नागेशस्तु उपर्युक्तं कैयटमतं दोषयुक्तं मत्वा तत् खण्डयन् वदति-आख्यातमित्यत्र एकत्वस्य विवक्षणे सति व्यक्तिपक्षे 'न ब्राह्मणं हन्याद्' इत्यादौ एकं ब्राह्मणम् अहत्वा कृती स्यादिति भाष्योक्तन्यायेन एकस्यैव आख्यातस्य वाक्यत्वं स्यात् न तु आख्यातान्तरस्येति।

काशिकाकाराभ्यां जयादित्य-वामनाभ्यामपि काशिकायाम् एकार्थः पदसमूहो वाक्यम्[41] इति वाक्यलक्षणं प्रस्तुतम्।



## विविधशास्त्रानुमतः वाक्यविभागः

बहुभिः शास्त्रकारैर्यथा वाक्यलक्षणं बहुधा कृतं तथा तैः वाक्यविभागः अपि बहुविध प्रवर्तितः। एते वाक्यभेदाः कस्मिन् सम्प्रदाये केषामाचार्याणां वर्तन्ते इति साम्प्रतं विमृश्यते-

**नैयायिकैः प्रतिपादितः वाक्यविभागः**-नैयायिकैः वाक्यं द्विविधमङ्गीक्रियते-प्रमाणवाक्यम् अप्रमाणवाक्यञ्चेति। तत्र प्रमाणवाक्यं नाम आकाङ्क्षा-योग्यता-सन्निधिमतां पदानां समूहः। यथा गामानय इत्यादि। अप्रमाणवाक्यं यथा-वह्निना सिञ्चति, ह्रदो वह्निमान् इत्यादि।[42]

तच्च वाक्यं कैश्चिद् अन्यथा अपि विभज्यते। यथा अन्नभट्टेन वाक्यं लौकिक-वैदिकत्वेन द्विविधमित्युक्तम्। ईश्वरोक्तत्वात् वैदिकं सर्वमेव प्रमाणम्, लौकिकञ्चा-प्रमाणमिति तस्य युक्तिः। तथा चोक्तं तर्कसंग्रहे-'वाक्यं द्विविधम्, लौकिकं वैदिकं च, तत्र वैदिकमीश्वरोक्तत्वात् सर्वमैव प्रमाणम्, अन्यदप्रमाणण्।[43] तत्र वेदघटकं वाक्यं वैदिकम्[44] इति वाक्यवृत्तिकारः। तस्येश्वरोक्तत्वे प्रमाणमनुमानम्। तच्च वेदः पौरुषेयो वाक्यत्वाद् भारतादिवत्।'[45]

शब्दशक्तिप्रकाशिकायां जगदीशेन वाक्यं चतुर्विधं स्वीकृतम्। तच्च यथा सुबन्तं, तिङन्तं, सुबन्तैकसमन्वितम् तथा सुप्तिङन्तद्वयगर्भञ्चेति। शब्दशक्तिप्रकाशिकायाः टीकायामुल्लिखिता अधोलिखिता कारिका एतच्चतुर्विधं वाक्यस्वरूपमेवमुल्लिखति-

**सुबन्तं च तिङन्तं च सुबन्तैकसमन्वितम्।**
**सुप्तिङन्तद्वयगर्भं वाक्यमेवं चतुर्विधम्।।**[46]

तत्रैव वाक्यं पुनरन्यथा द्विधा विभज्यते-महावाक्यम्, अवान्तरवाक्यं (खण्डवाक्यं) चेति। महावाक्यं च स्वघटकानेकनामलभ्यतादृशार्थबोधकं वाक्यम्[47] इति कथ्यते।

नैयायिकैः क्रियारहितमपि वाक्यत्वेन स्वीकृतमस्ति। अतः तेषां मतानुसारं-सुबन्तसमूहः, तिङन्तसमूहः तथा सुबन्त-तिङन्तसमूहश्चेत्येवंप्रकाशकं त्रिविधं वाक्यं सम्भवति। यथा 'त्रयः कालाः' इति सुबन्तसमूहात्मकं वाक्यं भवति। एवमेव 'पचति भवति' इति तिङन्तसमूहात्मकं वाक्यं भवति तथा 'चैत्रः पचति' इति सुबन्त-तिङन्तयोः समुदायात्मकं वाक्यं भवति।

**मीमांसकैः प्रतिपादितः वाक्यविभागः**-मीमांसकाः विधिवाक्यं निषेधवाक्यमिति द्विविधं वाक्यमङ्गीकुर्वन्ति। तत्र विधिवाक्यं यथा-स्वर्गकामो यजेत। एवमेव

निषेधवाक्यञ्च यथा न कलञ्जं भक्षयेत्। तन्त्रवार्तिके कुमारिलभट्टेन एकवाक्यत्वप्रसङ्गे उक्तम्–

**स्वार्थबोधे समाप्तानामङ्गाङ्गित्वव्यपेक्षया।**

**वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते।।**

तत्र च वाक्यस्य उदाहरणं यथा–दर्शपूर्णमासाभ्यां यजेत ज्योतिष्टोमेन इति तथा महावाक्यं नाम अखण्डार्थबोधकवाक्यमिति।

वाक्यबोधप्रसङ्गे अभिहितान्वयवादः, अन्विताभिधानवादश्चेति मीमांसकानां वादद्वयं प्रसिद्ध्यति। अभिहितान्वयवादिनां मते–संघातवादः क्रमवादः इति भर्तृहरिप्रतिपादितं वाक्यवादद्वयं फलितं भवति। एवमेव अन्विताभिधानवादिनां मते च आख्यात-शब्दवादः, आद्यपदवादः पृथक्– साकाङ्क्ष–सर्वपदवादश्चेति वादत्रयं फलितं दृश्यते।

**वेदान्तिभिः प्रतिपादितः वाक्यविभागः**–मायावादिभिः अद्वैतवेदान्तिभिः वाक्यं, महावाक्यञ्चेति द्विविधं वाक्यं स्वीकृतम्। तत्र च महावाक्यं यथा-प्रज्ञानं ब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि, अयमात्मा ब्रह्म इत्यादि।

**आलङ्कारिकैः प्रतिपादितः वाक्यविभागः**–साहित्यदर्पणकारस्य विश्वनाथ-कविराजस्य मतानुसारमपि वाक्यं द्विविधं भवति–वाक्यं तथा महावाक्यञ्चेति। साहित्यदर्पणस्य द्वितीयेऽध्याये तेन प्रतिपादितम्–

**वाक्योच्चयो महावाक्यमित्थं वाक्यं द्विधा मतम्।।**[48]

तत्र च वाक्यस्य उदाहरणमधोलिखितमुद्धृतं वर्तते–

**शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै–**
**र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।**
**विश्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीम्**
**लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता।।**[49]

तन्मतानुसारेण महावाक्यञ्च रामायण–महाभारतादि–महाकाव्यानि सन्ति।[50]

## वाक्यदोषाः

वाक्यस्य चत्वारो दोषाः भवन्ति–भ्रमः, प्रसादः, विप्रलिप्सा तथा कर्णपाटवञ्च। एतेषां चतुर्णां दोषाणां लक्षणानि अधोलिखितानि सन्ति–एकपदार्थे अपरपदार्थसंसर्गारोपो भ्रमः, अवाच्ये वाच्यत्वारोपः प्रमादः, अन्यथा ज्ञातस्यार्थस्यान्यथा बोधयितुमिच्छा



विप्रलिप्सा तथा शब्दोच्चारणानकूलताल्वादिव्यापारशून्यत्वं कर्णपाटवञ्च। अत्रैतद् ध्यातव्यमस्ति यत् आकाङ्क्षा–योग्यता–सन्निधियुक्तेषु प्रमाणवाक्येषु उपर्युक्ताः दोषाः न भवन्ति इति।

**भर्तृहरि–प्रतिपादितं वाक्यस्वरूपम्**–वैयाकरणेषु भर्तृहरिः वाक्यानां वर्गीकरणे मुखरो दृश्यते। तेन स्वकीये वाक्यपदीये वाक्यस्य अष्टविधं स्वरूपं यथाशास्त्रं विमृष्टम्। वस्तुतः तेन स्वस्थितिकालपर्यन्तं प्रसिद्धानामुपलब्धानां समेषां वाक्यसिद्धान्तानां संक्षेपः एव प्रस्तुतः। वाक्यपदीये उल्लिखितं वाक्यस्वरूप–प्रतिपादिकं कारिकाद्वयम् अधोलिखितम् अस्ति–

**आख्यातशब्दः संघातो जातिः संघातवर्तिनी।**

**एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहतिः।**

**पदमाद्यं पृथक् सर्वं पदं साकाङ्क्षमित्यपि।**

**वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम्।।**[51]

**1. आख्यातशब्दः वाक्यम्**–आख्यातशब्दः क्रियापदवाची। तस्मात् क्रिया हि वाक्यमिति तात्पर्यम्। भर्तृहरेः मतानुसारेण वाक्येन स्पष्टार्थप्रतीतिः तदैव सम्भवति यदा वाक्ये क्रिया प्रयुज्यते। तच्च क्रियापदं श्रूयमाणम् अनुमेयं वा इत्यन्यः प्रश्नः, किन्तु वाक्यार्थप्रतीत्यै क्रियासत्ता अनिवार्या एव। उक्तञ्च वाक्यपदीये हरिवृत्तौ तस्य श्रूयमाणं क्रियापदम् अनुमीयमानं क्रियापदं वा वाक्यमेव सर्वव्यवहारेषूपपद्यते[52] एकत्व–नित्यत्ववादिनस्तु विशिष्टा क्रिया एव व्यवहारार्थमेका एव क्रिया अनेकरूपेण परिकल्पते इति भर्तृहरिणा प्रतिपादितम्। वाक्ये कांचित् क्रिया एव नियता भवति। तस्याः प्रयोगेण कर्तुः कर्मणश्च स्वतः भानं भवति। 'देवः जलं वर्षति' इत्यस्मिन् वाक्ये वर्षति इति कथनेन कर्ता, कर्म च स्वतः एवाक्षिप्येते।

आख्यातशब्दः वाक्यम् इत्यस्य अन्यः पक्षः अपि भर्तृहरिणा प्रतिपादितः। एकैव क्रिया आत्मनि कानिचिद् विशिष्टानि पदान्यन्तर्भूय सम्पूर्णं वाक्यं मन्यते। उक्तं हि वाक्यपदीये–

**वाक्यं तदपि मन्येत यत्पदं चरितक्रियम्।**

**अन्तरेण क्रियाशब्दं वाक्यादेव हि दर्शनात्।।**[53]

अस्मिन् विकल्पे प्रयुक्तम् आख्यातपदं कात्यायनस्य–'आख्यातं साव्यय–कारक–विशेषणं वाच्यम्' इति वार्तिकाद् गृहीतं स्यात्। यतोहि अव्ययं कारक–

विशेषणविशिष्टम् आख्यातमेव वाक्यमिति कात्यायनः। अस्मिन् प्रसङ्गे आख्यातशब्दवादिनस्तु सविशेषणम् इत्येव स्वीकुर्वन्ति। यतोहि आख्यातस्य सम्बन्धेन सत्यवसरे कारकादिविशेषणानि स्वतः एव अध्याह्रियन्ते।

**2. संघातः वाक्यम्**–वर्णसंघातजं पदम्, पदसंघातजं वाक्यम् इति प्राचीनावधारणामाश्रित्य एव अयं 'संघातः वाक्यम्' इति वादः प्रवर्तते। एकत्ववादानुयायिनः 'एकार्थप्रतिपादकः पदसमूहो वाक्यम्' इति स्वीकुर्वन्ति। यथा सर्वाणि साधनानि मिलित्वा पाकक्रियां सम्पादयन्ति, यथा च सेवकाः सम्भूय शिविकामुद्वहन्ति तथैव पदान्यपि मिलित्वैव वाक्यार्थं प्रतिपादयन्ति। उक्तं हि भोजस्य शृङ्गारप्रकाशे-यथा त्रयोऽपि ग्रावाण उखां धारयन्ति, चत्वारोऽप्युद्यन्तारः शिविकामुद्यच्छन्ति, सर्वाणि अपि कारकाणि पाकं साधयन्ति तथा पदान्यपि सर्वाणि वाक्यार्थमन्ववगमयन्ति।

वस्तुतः संघातवादेऽस्मिन् पदानि स्वतन्त्राणि, परतन्त्राणि वा इत्याश्रित्य मीमांसा-दर्शने अभिहितान्वयवादः अन्विताभिधानवादश्चेति वादद्वयं प्रचलितम्। यद्यपि संघातवादोऽयम् अभिहितान्वयवादानुरूपो वर्तते इति पुण्यराजः अभिप्रैति किन्तु कुमारिलभट्टेन तदनुयायिभिः सुचरितमिश्रैश्च आलोचितोऽयं वादः।

भट्टमतानुसारेण परस्परमनुग्रहाद्यभावेन पदसंघातस्य वाक्यत्वं न सम्भवति। उक्तं हि तेन वाक्याधिकरणे श्लोकवार्तिके-

**एवमाद्यन्तं सर्वेषां पृथक् संघातकल्पने।**
**अन्योन्यानुग्रहाभावात् पदानां नास्ति वाक्यता।।**[54]

एतद्व्याख्यानं प्रस्तुवता सुचरितमिश्रेण काशिकाटीकायाम् उक्तम्-पदानां पृथग्भूतानां संघातवर्तिनां वा न वाक्यत्वम्, पृथग्भूतेषु हि तावद् वाक्यबुद्धिरेव नोत्पद्यते। संघातकल्पनेऽपि न पृथक् संघोऽपि विशेषः, तदानीमप्यन्योन्यानुग्रहस्य तेष्वनवगमात्, असति चाग्रहे वाक्यत्वकल्पनामात्रम् एकैकस्यापि तत्प्रसङ्गात्।

व्याकरणनिकाये भर्तृहरिणा संघातवादोऽयं कुत्रचित् समीक्षितः कुत्रचित् समर्थितश्च-

**सामान्यार्थस्तिरोभूतो न विशेषेऽवतिष्ठते।**
**उपात्तस्य कुतस्त्यागो निवृत्तः क्वावतिष्ठताम्।।**[55]

किन्तु यथा सावयवाः वर्णाः निरर्थकाः अपि समुदिताः सन्तः सार्थकाः भवन्ति तथैव पदानि समुदितानि वाक्यरूपेण सार्थकानि भवन्ति इति वदता अग्रे पुनः तेन



स्वमतमुपस्थापितम्-

**यथा सावयवा वर्णा विना वाक्येन केनचित्।**
**अर्थवन्तः समुदिता वाक्यमप्येवमिष्यते।।**[56]

**3. संघातवर्तिनी जातिः वाक्यम्**–अस्मिन् विकल्पे एकः शब्दः वाक्यमित्युच्यते। स च शब्दः जातिनिबन्धनः इति स्वीक्रियते। एवं शब्दजातिरेव वाक्यम् इति तात्पर्यम्। यथा आक्षेपविशेषजनिते भ्रमणे कम्पन-रेचन-उत्प्रेक्षणादि-भेदसम्भवेऽपि तत्र एकैव भ्रमणत्वजातिरभिव्यज्यते तथैव वर्णपदवाक्यान्यपि ध्वनिव्यञ्जितानि भवन्ति। तत्र वर्णापचितध्वनिव्यङ्ग्यस-दृशैरन्यैश्च ध्वनिभिः निरवयवं पदं व्यज्यते। प्रचिततमैः तुल्यातुल्यैश्च ध्वनिभिः वाक्यं व्यञ्जितं भवति। उक्तञ्च हरिवृत्तौ-

शब्दजातेरेव वाक्यत्वे भ्रमणत्वादयो दृष्टान्तत्वेनोपन्यस्ताः। अपचितध्व-निव्यङ्ग्यस्तावदेको वर्णः। यथा तस्याभिव्यक्ति-निमित्तैः सदृशैरन्यैश्च श्रुतिभिन्नैरेकं निरवयवञ्च पदं व्यज्यते, तथैव तुल्यातुल्यैः प्रचिततमैः वाक्यमिति।[57] पुण्यराजेन अयं शब्दाकृतिवाक्यवादः जातिस्फोटरूपेण स्वीकृतः-तेन भिन्नप्रयत्नोदीरित-ध्वन्यभिव्यक्तोऽयं जातिस्फोटो विलक्षण एवेति बोध्यम्[58] इति।

**4. एकोऽनवयवः शब्दः वाक्यम्/निरवयवः शब्दः वाक्यम्**–एतस्मिन् सिद्धान्ते वाक्यस्य एकत्वं, निरवयवत्वम् अविच्छिन्नत्वञ्च स्वीक्रियते। तत्र अवयवाः काल्पनिकाः भवन्ति। एकमेव चित्रं निरवयवं पूर्णञ्च भवति। आदौ चित्रं परिपूर्णं सद् दृश्यपथमायाति, ततश्च भिन्न-भिन्नभागेषु द्रष्टुः दृष्टिः गच्छति। वस्तुतः चित्रस्य स्वरूपज्ञानाय तदवयवेषु दृक्पातः आवश्यकः। एवमेव वाक्यमपि निरवयवं निराकाङ्क्षं च भवति। तस्य ज्ञानाय शब्दानां परस्परं सम्बन्धानुसन्धानपूर्वकं वाक्यं विश्लिष्यते। किन्तु मूलरूपेण वाक्यं निर्विभागं भवति। तथा चोक्तं भर्तृहरिणा-

**चित्रस्यैकस्वरूपस्य यथा भेदनिदर्शनैः।**
**नीचादिभिः समाख्यानं क्रियते भिन्नलक्षणैः।।**
**तथैवैकस्य वाक्यस्य निराकाङ्क्षस्य सर्वतः।**
**शब्दान्तरैः समाख्यानं साकाङ्क्षैरनुगम्यते।।**[59]

पुण्यराजस्तु अक्रमवाक्यं स्फोटरूपेण तथा अनवयवापेक्षं वाक्यञ्च व्यक्तिस्फोटरूपेण स्वीकरोति। उक्तञ्च तेन-परमार्थस्त्वसावक्रम एव स्फोटात्मा प्रतिभासः। उपाधिवशात्तु

तत्र बुद्धिः वितततेवानुगम्यते इति बोध्यम्।[60] वाचस्पतिमिश्रेणापि तत्त्वविन्दौ वाक्यस्य निरवयत्वं प्रतिपादितम्। तत्र वर्णपदविभागः मिथ्यारूपः इति तस्य अभिप्रायः। तन्मतानुसारेण–अनवयवमेव वाक्यम्। अनाद्यविद्योपदर्शितालीक–वर्णपदविभागमस्याः निमित्तमिति केचित्।[61]

परन्तु धर्मकीर्तिना निराकृतोऽयं निरवयववादः। वाक्यस्य निरवयवत्वस्वीकारे तत्र क्रमाभासो न सम्भवति तथा कालभेदोऽपि न सिद्ध्यति। यतोहि एकस्यैव वस्तुनः क्रमेण ज्ञानं न भवति। वाक्य–वर्णपक्षः अङ्गीक्रियते चेत्तर्हि अपूर्णवाक्यश्रवणेऽपि पूर्णवाक्यज्ञानं स्यात्। एतत् सर्वं प्रमाणवार्तिके इत्थं प्रतिपादितमस्ति–'एकत्वेऽपि ह्यभिन्नस्य क्रमशो गत्यसम्भवात्। कालभेद एव न युज्यते। न ह्येकस्य प्रतिपत्तिः युक्ता। गृहीतीगृहीतयोरभेदा गृहीतीगृहीताभावात्। क्रमेण च वाक्यप्रतिपत्तिः दृष्टा। सर्ववाक्यस्मरण–कालस्यानेकक्षण–निमेषानुक्रमः परिसमाप्तः। वर्णरूपासंस्पर्शनश्चैकबुद्धिप्रतिभासिनः शब्दात्मनोऽप्रतिभासमानात् वर्णक्रमप्रतीतेः। तदविशदेऽप्यनुक्रमकृतत्वात् वाक्यभेदस्यानुक्रमवतो वाक्यप्रतीतिः। वर्णानुक्रमोपकारानपेक्षणे तैः यथाकथञ्चित् प्रयुक्तैरपि यत् किञ्चिद् वाक्यं प्रतीयते। विना वा वर्णैः तैः अनुक्रमवद्भिः अक्रमस्योपकारायोगात्। अक्रमेण च व्याहर्तुमशक्यत्वाद् गत्यन्तरभावाच्च। नैव वाक्ये वर्णाः सन्ति। तदेकमेव शब्दरूपं व्यञ्जकानुक्रमवशादनुक्रमवद्वर्णविभागवत् प्रतिभासीति चेत् अनुक्रमवता व्यञ्जकेनाक्रमस्य व्यक्तिप्रयुक्ता व्यक्ताव्यक्तविरोधात्। अवर्णभागे च वाक्येऽसकलश्राविणोऽसकलवाक्यगतिर्न स्यात्। एकस्य सकलाभावात् सकलश्रुतिर्वा न कस्यचित्।'[62]

परन्तु निरवयववादमधिकृत्य प्रस्तुतं धर्मकीर्तेः इमम् आक्षेपं मण्डनमिश्रः खण्डयति स्फोटसिद्धौ। अस्मिन् प्रसङ्गे धर्मकीर्तिना आक्षेपद्वयमुपस्थापितम्। अखण्डवाक्यत्वस्वीकारे वर्णानां क्रमप्रतीतिः न भवति इति प्रथमः आक्षेपः। एवमेव वाक्यस्य एकांशश्रवणे तस्य ज्ञानापत्तिश्चेति द्वितीयः। अनयोः आक्षेपयोः प्रथमाक्षेपस्य खण्डनं कुर्वता मण्डनमिश्रेण उक्तम्–एकत्वेऽपि क्रमशो मतिरनपाख्येयोपाख्येयाकार-प्रलयभेदेन पुरस्तात् प्रपञ्चिता, व्यञ्जकसादृश्यास्तु शब्दान्तरग्रहणाभिमानिनः तेन नाश्रवणं सकलश्रवणं वेति।[63] ततः द्वितीयाक्षेपस्य खण्डनं कर्तुं तेनोक्तम्–'तेन कारणेन परमार्थाभावपक्षेऽपि भागशो ग्रहणमुपपद्यते एव, न पुनः अश्रवणं वा सकलश्रवणं वापद्येतेति।'[64]

**5. क्रमः वाक्यम्**–एतन्मतानुसारं क्रमातिरिक्तं वाक्यं नास्ति। ध्वनिसमूहेन पदसमूहेन वा यः अर्थः प्रतिभासते तत्र क्रमः एव कारणं न तु वाक्यम्। अतः अस्मिन् विकल्पे वाक्यस्य सत्ता एव न स्वीक्रियते। शब्देषु च यः क्रमबोधः तत्र कालशक्तेः



सन्निवेशः बोध्यः। यतोहि कालशक्तेः भिन्नं क्रमवस्तु नास्ति। उक्तञ्च वाक्यपदीयस्य हरिवृत्तौ–क्रमो हि शब्देषु कालशक्तिरूपविशेषस्य निवेश एव। सः कालात्मो न व्यतिरिच्यते।[65] पदानां नियतसन्निवेशजन्यो विशेष एव वाक्यमिति चेत् तदा विशेषस्य क्रमजन्यत्वात् क्रम एव वाक्यम्। एतन्मते पदेषु एव अर्थसत्ता मन्यते। वाक्यन्तु प्रलापमात्रम्। उक्तञ्च हरिवृत्तौ–तेन वाक्यमित्यवस्तुक्रमेणेदमभिलापमात्रं पदमेवार्थवदिति।[66]

क्रमवादोऽयं दोषदुष्टः वर्तते इत्यतः अयं पक्षः मीमांसकैः आलोचितः। किन्तु पदानां क्रम एव वाक्यमिति स्वीकारे पदक्रमभेदे वाक्यभेदापत्तिः। यथा–गौः शुक्लः, शुक्लः गौः इत्यनयोः वाक्ययोः पदक्रमभेदात् वाक्यभेदे अर्थभेदापत्तिः। 'तेन वाक्यं न भिद्यते,[67] पदाख्या वाक्यसंज्ञा च शब्दत्वं नेष्यते तयोः'[68] चेत्याद्युक्तिभिः क्रमस्य वाक्यत्वं खण्डितं भर्तृहरिणा। वस्तुतः तत्कार्यवाहकत्वात् क्रमः वाक्यमिति उच्यते न तु क्रम एव वाक्यमिति तात्पर्यार्थः।

**6. बुद्ध्यनुसंहतिः वाक्यम्**–अनुक्रमेण संहतिः अनुसंहतिः। कल्पितानां पदबुद्धीनाम् अनुसंहतिः बुद्ध्यनुसंहतिः। बुद्ध्यसंहतिः अपि वाक्यं भवति इति षष्ठः वाक्यलक्षणपक्षः। बुद्ध्यनुसंहतिः वाक्यम् इति पक्षे वाक्यम् अखण्डं भवति। तत्र पदानि न सन्ति किन्तु पदानि पदबुद्ध्या कल्पितानि सन्ति। अस्मिन् पक्षे पदसमुदायरूपत्वं बुद्ध्या प्रकल्प्य वाक्यत्व–व्यवहारः स्वीक्रियते। एवं बुद्ध्यनुसंहतिः वाक्यम् इति पक्षे तु बाह्यस्य जातिव्यक्तिस्फोटस्य न वाक्यत्वं किन्तु आभ्यन्तरस्फोटस्य एव। तथा चोक्तं भर्तृहरिणा वाक्यपदीये–

**यदन्तःशब्दतत्त्वं तु नादैरङ्के प्रकाशितम्।**
**तदाहुरपरे शब्दं तस्य वाक्ये तथैकता।।**[69]

अर्थात् हृदयान्तः अवस्थितं बोधरूपं शब्दतत्त्वम् एकक्रममपि अतथाभूतैः क्रमवद्विभागैः नादरूपैः प्रकाशितम्। तदेव आचार्यैः पदस्वरूपमिति कथ्यते। यथा तस्य पदस्वरूपस्य शब्दस्य एकता स्वगत–सजातीय–भेदशून्यता तथा वाक्येऽपि योग्यत्वात् तादृशीमेव एकतामाहुः।

**7. आद्यपदं वाक्यम्**–सप्तमेऽस्मिन् वाक्यलक्षणे वाक्यगतम् आद्यपदमेव वाक्यमिति कथ्यते। तथा चोक्तं भर्तृहरिणा–

**केवलेन पदेनार्थो यावानेवाभिधीयते।**
**वाक्यस्थं तावतोऽर्थस्य तदाहुरभिधायकम्।।**[70]

उदाहरणार्थं 'देवदत्तः गामभ्याज दण्डेन' इत्यस्मिन् वाक्ये देवदत्तपदं वाक्यार्थः भवति। तदुक्तं भर्तृहरिणा वाक्यपदीये–

**विशेषशब्दाः केषाञ्चित् सामान्यप्रतिरूपकाः।**
**शब्दान्तराभिसम्बन्धाद् व्यज्यते प्रतिपत्तृषु।।**[71]

'देवदत्तः गामभ्याज दण्डेन' इत्यस्मिन् वाक्ये देवदत्तपदं गां वधान इत्यस्माद् विशिष्टमेव भवति। अतः वक्त्रा समुदीरितं चेदपि भ्रमात् सकलसाधारणमिव प्रतिभाति। परवर्तिनि काले गवादिपदसम्बन्धात् विशिष्टा प्रतिपत्तिरभिव्यज्यते। एवं सकलविशेषण–खचितश्च प्रथमतरमेवोपक्रान्तः संसृष्ट एवार्थः वाक्यार्थः भवति इति सिद्ध्यति।

**पूर्वैरर्थैरनुगतो यथार्थात्मा परः परः।**
**संसर्ग एव प्रक्रान्तस्तथाद्येष्वर्थवस्तुषु।।**[72]

अत्र तात्पर्यमेवं व्रर्तते यद् देवदत्तादिषु उच्चरितेषु पदेषु रूपभेदः अस्ति चेदपि पश्चादुच्चारितं पदं पूर्वानुसन्धानात् विशिष्टं विज्ञायते। एवमत्रापि संसर्गस्य प्रक्रान्तत्वात् प्रथम एव शब्दः षष्ठ्यर्थमुपादाय प्रवृत्तः।

**8. पृथक् सर्वपदं वाक्यम्**–एतद्विकल्पानुसारं वाक्ये विद्यमानं सर्वम् (आद्यं, मध्यम् अन्त्यञ्च) पदं समुदितं वाक्यं भवति इत्यर्थः। एतद्विकल्पविषये उक्तञ्च भर्तृहरिणा–

**नियतं साधने साध्यम् क्रिया नियतसाधना।**
**स संनिधानमात्रेण नियमः सन् प्रकाशते।।**[73]

अर्थात् साध्यं साधनञ्च परस्परं नियतमेव। केवलम् आकाङ्क्षावशात् इतरपदार्थसन्निधाने सति नियमः सन्नेव प्रकाशते इति आक्षिप्तपदान्तराणि पदान्येव वाक्यम्। वस्तुतः वाक्ये विद्यमानानि सर्वाणि पदानि प्रत्येकं साकाङ्क्षाणि भवन्ति। यतोहि पदानां परस्पराकाङ्क्षायां समानायां विशेषः अभिधीयते। अर्थात् कारकपदं क्रियायां गुणभूतं सत् पदान्तरम् आकाङ्क्षति। क्रियापदं तु प्रधानभावेन अवस्थितं कारकपदानि अपेक्ष्यते। एवं प्रत्येकं पदम् अपरस्य साकाङ्क्षं भवति।

**वाक्यस्वरूपविमर्शः**

कुमारिलः श्लोकवार्तिकस्य वाक्याधिकरणे भर्तृहरिप्रतिपादितम् उपर्युक्तमष्टविधं



वाक्यलक्षणमक्षिपन् वदति–

**एवमाद्यान्तसर्वेषां पृथक्संघातकल्पने।**
**अन्योन्यानुग्रहाभावात् पदानां नास्ति वाक्यता।।**
**आद्यं यदि पदं सर्वैः संस्क्रियेत विशेषतः।**
**ततस्तदेव वाक्यं स्यात् अन्यश्च द्योतको गणः।।**
**एवमन्त्येषु सर्वेषु पृथग्भूतेष्ववस्थितम्।**
**स्वतन्त्रेषु हि वाक्यत्वं कथञ्चिन्नोपलक्षितम्।।**
**स्फोटजातिनिषेधश्च स्यात् पदस्फोटजातिवत्।**
**वार्यः पदक्रमो वाक्यं यथा वर्णक्रमः पदम्।।**
**बुद्ध्या न चोपसंहर्तुं क्रमो निष्कृष्य शक्यते।**
**पदान्येव हि तद्वन्ति वर्तन्ते श्रोत्रबुद्धिवत्।**
**तावत्स्वेव पदेष्वन्यः क्रमोऽन्यश्च प्रतीयते।**
**तत्र यावत्क्रमं भेदो वाक्यार्थस्य प्रसज्यते।।**[74]

पार्थसारथिमिश्रः स्वकीये रत्नाकरे उपर्युक्तानामासां कारिकाणां व्याख्यानावसरे कुमारिलमतं स्पष्टीकरोति–'येऽपि वैयाकरणैरुक्ता वाक्यविकल्पाः 'आख्यातं..... न्यायदर्शिनाम्' इति तान् निराकरोति एवमिति। अन्त्यपदवाक्यत्वं परैरनुपन्यस्तमपि सम्भवादुपन्यस्यते, तदनन्तरं हि वाक्यार्थः प्रतीयते। यत्तावत् आद्यस्य अन्त्यस्य सर्वेषां वा प्रत्येकं मिथोऽनुग्रहापेक्षया संघातस्य वा वाक्यत्वकल्पनं तदयुक्तमितरेतरानुग्रहापेक्षया संघातस्य वा वाक्यत्वकल्पनं तदयुक्तमितरेतरानुग्रहासम्भवादिति। अनुग्रहासम्भवमेव दर्शयति–आद्यमिति। न चाद्यस्य इतरैरनुग्रहः कश्चिद् दृश्यते, न सम्भवति अयौगपद्यादिति। तथाऽन्त्यस्य सर्वेषां वा संहतानां पृथग्भूतानां वा नास्त्यनुग्रहः इत्याह एवमिति। मा भूत्तदनुग्रहस्तथापि किमिति वाक्यत्वं न भवति अत आह स्वतन्त्रेष्विति। एवं च व्यस्तोच्चरितानां गौरश्व इत्यादीनां च वाक्यत्वं स्यादिति। एकोऽनवयवः शब्दः इति च जातिः संघातवर्तिनी इति च निराकरोति स्फोटेति। क्रमो बुद्ध्यनुसंहतिः इत्येतन्निराकरोति वार्य इति। बुद्ध्यनुसंहृतिश्च क्रमस्यासिद्धेति आह–बुद्ध्येति। कथमित्याह पदानीति। किं च वर्णक्रमस्य पदत्वं युज्येतापि स हि अर्थप्रतीत्यौपयिकः क्रमान्तरेऽर्थप्रतीत्यभावात्।

पदक्रमस्य तु वाक्यार्थप्रत्ययानौपयिकस्य कथं वाक्यत्वम् औपयिकत्वे वा क्रमभेदे वाक्यार्थभेदः स्यादित्याह तावत्स्विति।'[75]

## वाक्यस्फोट :

वैयाकरणाः स्फोटात्मकं वाक्यमङ्गीकुर्वन्ति। स्फोटो नाम 'स्फुटत्यनेन अर्थः' इति। 'स्फोट : शब्दो ध्वनिस्तस्य व्यायामादुपजायते' इति वाक्यपदीयकारः अभिप्रैति। अभिव्यक्तवादको मध्यमावस्थ आन्तरः शब्दः इति प्रदीपे कैयटः प्रतिपादयति. स च स्फोटो द्विधा-व्यक्तिस्फोटो जातिस्फोटश्च। व्यक्तिस्फोट : पुनः अखण्डः सखण्डश्च। सखण्डः पुनः वर्ण-पद-वाक्यभेदेन त्रिधा। अखण्डश्च पद-वाक्यभेदेन द्विधा। एवं पञ्च व्यक्तिस्फोटाः।

एवमेव जातिस्फोटश्च वर्ण-पद-वाक्यभेदेन त्रिधा विभक्तः। इत्थमाहत्य अष्टौ स्फोटाः भवन्ति। तत्र अखण्डवाक्यस्फोट : मुख्यः इति नव्याः। वाक्यजातिस्फोटः इति प्राञ्चः। वस्तुतः पद-प्रकृतिः संहिता इति प्रातिशाख्यमत्र मानम्। पदानां प्रकृतिरिति षष्ठीतत्पुरुषे अखण्डवाक्यस्फोटपक्षः सिद्धः। बहुव्रीहौ तु सखण्डवाक्यस्फोटः अभिप्रेतः।

भर्तृहरिः वाक्यपदीयस्य वाक्य-काण्डे अखण्ड-वाक्यस्फोटमङ्गीकृत्य वदति-

**पदप्रकृतिभावश्च वृत्तिभेदेन वर्ण्यते।**
**पदानां संहिता योनिः संहिता वा पदाश्रया।।**[76]

पद-वाक्य-स्फोटयोः मध्ये वाक्यस्फोटस्यैव मुख्यत्वमङ्गीकृतं वैयाकरणैः। अस्मिन् प्रसङ्गे नैयायिक-मीमांसक-शाब्दिकैः स्व-स्व-सिद्धान्त-प्रतिपादक-ग्रन्थेषु महान्तो विचाराः प्रस्तुताः। शब्दः बोधे कारणं भवति। श्रोत्रग्राह्यः गुणः शब्दः इति न्यायमतमनुसृत्य श्रोत्रग्राह्याणां वर्णानामेव शब्दाभिधेयत्वम्। प्रत्येकं वर्णानामनर्थकत्वात् एकैकस्य वर्णस्य तत्र अर्थबोधकारणत्वं वक्तुं न शक्यते। अतः वर्णसंघातस्यैव कारणत्वं वक्तव्यम्। किन्तु उच्चरित-ध्वंसीनां वर्णानां तादृक् संघात एव एकदा श्रोत्रग्राह्यो न भवति। उक्तं च महाभाष्ये-एकैकवर्णवर्तिनी वाक् इति। न द्वौ वर्णौ युगपदुचार्येते। गौरिति गकारे यावद्वाग्वर्तते न औकारे, न वा विसर्जनीये। एवमेव यावदौकारे न गकारे,'न विसर्जनीये च। एवं पुनः यावद्विसर्जनीये न गकारे, न औकारे उच्चरितप्रध्वंसित्वात्।

अस्य समाधानरूपेण मीमांसकाः वदन्ति यत् प्रत्येकवर्णानुभवजन्याः संस्काराः एकां स्मृतिमुपजनयन्ति। तस्यां च स्मृतौ सर्वे वर्णाः युगपदेव प्रतिभान्ति इति स्मृति-प्रतिभासितानां वर्णानामेव वाचकत्वम्। उक्तं हि कुमारिलभट्टेन-

**यद्वा प्रत्यक्षतः पूर्वं क्रमजातेषु यत्परम्।**
**समस्तवर्णविज्ञानं तदर्थज्ञानकारणम्।।**



महाभाष्ये पतञ्जलिरपि प्रतिपादयति-

**बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तत्वन्नीतिः।**
**शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम्।।**

वस्तुतः क्रमवद्वर्णसमूह एव पदम्, वाक्यञ्च। तस्माद् वर्णा एव पदं वाक्यञ्च। उक्तं च शाबरभाष्ये-'अथ गौरित्यत्र कः शब्दः? गकारौकारविसर्जनीयाः इति भगवान् उपवर्षः' इति।

वेदान्तिनोऽपि मीमांसका इव प्रत्येकवर्णानुभव-भावनानिचय-लब्धजन्म-स्मृतिदर्पणारूढानां वर्णानामेव वाचकत्वमङ्गीकुर्वन्ति। उक्तं च ब्रह्मसूत्रस्य शाङ्करभाष्ये-'वृद्धव्यवहारे च इमे वर्णाः क्रमाद्यनुगृहीताः गृहीतार्थविशेषसम्बन्धाश्च सन्तः स्वव्यवहारेऽपि एकैकवर्णग्रहणानन्तरं समस्तवर्णप्रत्यवमर्शिन्यां बुद्धौ तादृशा एव प्रत्यवभासमानाः तं तमर्थमव्यभिचारेण प्रत्याययिष्यन्ति' इति।

एवमेव नैयायिकाः अपि स्मृतानां तेषां वर्णानां वाचकत्वं मीमांसकाभ्युपगतमङ्गी-कुर्वन्ति। उक्तं च जयन्तभट्टेन न्यायमञ्जर्याम्-क्रमोत्पन्नानामपि तेषां संस्कारद्वारा कार्यकरत्वं सम्भवति इति।

वैयाकरणाः तथा पातञ्जलाः योगिनश्च वर्णातिरिक्तं पदमुपपादयन्ति। प्राचीनाः वैयाकरणास्तु वर्णमालायामेकं पदमेकं वाक्यमस्ति इति स्वीकुर्वन्ति। एवं 'तदेवेदं घटपदं....घटमानय' इति वाक्यमिति प्रत्यभिजानन्ति। एतदनुरोधेन वर्णातिरिक्तस्य कस्यचित् अखण्डस्य पदस्य वाक्यस्य च स्वीकारणमावश्यकमिति ते स्वीकुर्वन्ति।

भर्तृहरिः निरवयवशब्दः वाक्यम् इत्यस्य पक्षपाती वर्तते। तन्मते निरवयव-शब्दात्मको वाक्यवाद एवोचितः। वाक्यपदीयस्य टीकाकाराश्चामुमेव पक्षं मनसि निधाय 'सूत्रकारस्याभिप्रायसमाश्रयेण बाह्यरूपः आन्तरो वा निर्विभागः शब्दार्थमयो बोधस्वभावः शब्दः स्फोटलक्षणे एव वाच्यम्'[77] इति प्रतिपादितवन्तः। 'निरवयव-वाक्यवादः वाक्यस्यैव निरंशस्य वाचकत्वादन्तरा पदप्रतिपत्तिः विभ्रमः' इति हेलाराजोऽपि प्रतिपादयति।[78]

## उपसंहारः

भाषां विना लोके व्यवहारो न सम्भवति। वाक्यं (सार्थकं पदसमूहं) विना भाषाभिव्यक्तिर्न सम्भवति। अतः न्याय-मीमांसा-व्याकरणादिशास्त्रेषु वाक्यविषयको

विचारः दरीदृश्यते। उपरि-वर्णितानां वाक्यलक्षण-विभागादीनामालोके अधोलिखितं वाक्यस्वरूपं निष्कर्षरूपेण समक्षमायाति-

पदसंघातजं वाक्यम्, पदसमूहो वाक्यम्, एकार्थः पदसमूहो वाक्यम्, विशिष्टार्थ-परशब्दत्वं वाक्यम्, स्वार्थबोधसमाप्तः पदसमूहः वाक्यम्, समभिहारो वाक्यम्, सुप्तिङन्तचयं वाक्यम्, योग्यताकाङ्क्षासत्तियुक्त पदोच्चयः वाक्यम्, विशिष्टैकार्थ-प्रतिपादक-निराकाङ्क्षपदसमूहो वाक्यम्, एकतिङ् वाक्यम् अथवा एकतिङन्तार्थ-मुख्यविशेष्यकबोधजनक-पदसमूहो वाक्यं चेति।

❖ एवमेव आख्यातशब्दः वाक्यम्, संघातः वाक्यम्, संघातवर्तिनी जातिः वाक्यम्, एकोऽनवयवः शब्दः वाक्यम्, क्रमः वाक्यम्, बुद्ध्यनुसंहतिः वाक्यम्, आद्यपदं वाक्यम् तथा पृथक् सर्वं पदं वाक्यञ्चेति भर्तृहरिसम्मतमन्यदपि अष्टविधं वाक्यलक्षणं सङ्गच्छते।

❖ एते वाक्यविकल्पाः केषामाचार्याणां वर्तन्ते इत्यस्मिन् विषये मतैक्यं नास्ति। पुण्यराजः एतेष्वष्टविकल्पेषु केषाञ्चन सम्बन्धः मीमांसादर्शनेनापि स्वीकरोति। तन्मतानुसारं संघातवादः क्रमवादश्चेति विकल्पद्वयम् अभिहितान्वयवादिनां मतानुरूपं वर्तते।

❖ एवमेव आख्यातशब्दवादः आद्यपदवादः, पृथक्- साकाङ्क्ष-सर्वपदवादश्चेति वाक्यविकल्पत्रयम् अन्विताभिधानवादिनां मतानुरूपमस्ति। तेनोक्तम् यद् 'एतेऽष्टौ वाक्यविकल्पा आचार्याणाम्।'

❖ तत्राखण्डपक्षे जातिः संघातवर्तिनी, एकोऽनवयवः शब्दः, बुद्ध्यनुसंहतिः इति त्रीणि लक्षणानि।

❖ खण्डपक्षे तु आख्यातशब्दः, क्रमः, संघातः, पदमाद्यम्, पृथक् सर्वपदं साकाङ्क्षमिति पञ्च लक्षणानि।

❖ अत्रापि संघातः, क्रमः चेति अभिहितान्वयपक्षे लक्षणद्वयम्। आख्यातशब्दः, पदमाद्यम्, पृथक् सर्वपदं साकाङ्क्षमिति अन्विताभिधानपक्षे लक्षणत्रयमिति विभागः।

❖ प्रसिद्धाः मीमांसकाः कुमारिलभट्ट-शालिकनाथ-सुचरितमिश्रादयः वाक्यपदीये चर्चितानामेतेषां वाक्यविकल्पनां सम्बन्धः व्याकरणदर्शनेनैव स्वीकुर्वन्ति।

❖ तत्तच्छास्त्रेषु उपलब्धेषु उपर्युक्तेषु समेषु वाक्यलक्षणेषु वैयाकरण-निकाये कात्यायनकृतं वाक्यलक्षणम् 'आख्यातं साव्ययसकारकविशेषणं वाक्यम् एकतिङ्'[79]



इति सर्वप्रथमं स्वीक्रियते। पतञ्जलिना अपि एतन्मतं समर्थितम्। कात्यायनकृतस्य वाक्यलक्षणस्य कृते तेन अपूर्वशब्दस्य प्रयोगः कृतः-इदमाद्यापूर्वं क्रियते वाक्यसंज्ञा, समानवाक्याधिकारश्च[80] इति।

❖ जैमिनिना प्रोक्तं वाक्यलक्षणमपि अतीव प्राचीनं वर्तते। वस्तुतः जैमिनि-कात्यायनकृतयोः वाक्यलक्षणयोः पौर्वापर्यनिर्धारणे काठिन्यं वर्तते।

❖ महाभाष्यकारेण पतञ्जलिना कात्यायनीय-वाक्यलक्षणस्य कृते आद्यशब्दस्य, अपूर्वशब्दस्य च प्रयोगः कृतः। अतः वैयाकरणानां मतानुसारं कात्यायनकृतमेव वाक्यलक्षणं प्राचीनतरं शास्त्रीयञ्च वर्तते।

❖ पतञ्जलिना प्रयुक्तेन अपूर्वशब्देन ध्वन्यते यत् पूर्वं वाक्यलक्षणं तथा उपलब्धं नासीद् यथा कात्यायनेन वाक्यं परिभाषितम्। एतदेव वाक्यलक्षणम् आधारीकृत्य कात्यायनो वाक्यकारः इति नाम्ना प्रसिद्धः अभवत्। व्याकरणशास्त्रे वाक्यशब्दः वार्तिकशब्दश्च पर्यायरूपेण प्रयुज्यते। वस्तुतः 'वार्तिककारीयमेव वाक्यलक्षणं ज्याः' इति कैयटः प्रदीपे प्रकाशयति। तस्य मतानुसारेण जैमिनेः वाक्यपरिभाषा तु लौकिकी अस्ति।

☯ पक्षान्तरे कात्यायनस्य वाक्यपरिभाषा च शास्त्रीय वर्तते। भर्तृहरि-भोज-विट्ठलाचार्यैरपि कात्यायनेन प्रस्तुतं वाक्य-लक्षणं शास्त्रीयमेव स्वीक्रियते।

☯ नागेशेन किन्तु तस्य लौकिकत्वं लोकशास्त्रोभयसाधारणत्वं वा स्वीकृतं वर्तते।

☯ लौकिकं वाक्यस्वरूपन्तु कात्यायनात् पूर्वमेव व्याडिना संग्रहे उद्घोषितम्। किन्तु तत् शास्त्रीयं नास्ति।

☯ जैमिनिना कृतमपि वाक्यलक्षणं शास्त्रीयं नास्तीति केचित्। मीमांसा-सूत्रस्य प्राचीन-टीकाकारैः जैमिनि-कृतं वाक्यलक्षणं लौकिकं मन्यते। किन्तु कुमारिलभट्टैः तदनुयायिभिश्च तल्लक्षणं शास्त्रीयमेव मन्यते।

एतानि वाक्यलक्षणानि अधिकृत्य नैकाः शङ्काः सम्भवन्ति। यथा सुप्तिङन्तचयं वाक्यम् इत्यत्र-सुबन्तसमुदायः तिङन्त-समुदायश्च सम्मिल्य वाक्यं भवति, अथवा सुबन्ततिङन्तयोः समुदायो वाक्यं भवति अथवा सुबन्तानां समुदायः तिङन्तानां समुदायश्च स्वतन्त्ररूपेण वाक्यं भवति? एवमेव पदसमूहो वाक्यम् इति लक्षणे च यथा-सार्थक-शब्दानामनर्थक-समुदायोऽपि वाक्यं भविष्यति। यथा 'गौः अश्वः पुरुषः हस्ती' इत्यादि, यत्र शब्दास्तु सार्थकाः सन्ति किन्तु तेषां समुदायः सार्थको नास्ति। एकतिङ् वाक्यमिति पक्षे च 'एकतिङ्' इत्यंशे कर्मधारयं स्वीकृत्य एकमेव यत्

तिङ् तद् वाक्यमस्ति इति ज्ञातव्यम् अथवा बहुव्रीहिमङ्गीकृत्य 'एकमस्ति तिङ् यस्मिन् तद् वाक्यमस्ति' इति वा ज्ञातव्यम्।

उपर्युक्तविचाराधारेण निष्कर्षरूपेण एतदुपसंहर्तुं शक्यते यद् वाक्य-स्वरूप-विचारप्रसङ्गे पाणिनिप्रभृतयः प्राचीनाः वैयाकरणाः तथा जागरुकाः नासन् यथा तत्परवर्तिनः आचार्याः पतञ्जलि-प्रभृतयः। वस्तुतः कात्यायनादारभ्य एतद्विषयकं विशद-चिन्तनं समुपलभ्यते। ततः पतञ्जलि-भर्तृहरि-कौण्डभट्ट-नागेशादिभिश्च तच्चिन्तनमग्रेसारितम्।

वाक्यस्वरूपादिविषये तु पतञ्जलिरपि तथा मुखरो न दृश्यते यथा भर्तृहरिः। एकतिङन्तार्थमुख्यविशेष्यकबोधजनकपदसमूहो वाक्यम् इति वैयाकरणसम्मतं वाक्य-लक्षणं प्रायः सर्वैरङ्गीक्रियते। तत्रापि वार्तिककारीयमेव वाक्यलक्षणं ज्याः इति कैयटः प्रदीपे प्रकाशयति। जैमिनेः वाक्यपरिभाषा तु लौकिकी, कात्यायनस्य वाक्यपरिभाषा च शास्त्रीया इति कैयटस्य अभिमतम्। लौकिकं वाक्यलक्षणं प्रकुर्वता कैयटेन प्रदीपे उक्तम्-अर्थत्वादेकं वाक्यं साकाङ्क्षं चेद् विभागे स्यादिति। इह तु वाक्यम् आख्यातं साव्ययं कारकं विशेषणम् इति परिभाषितं वर्तते।[81] वस्तुतः भारतीयपरम्परायां कात्यायनः वाक्यकाररूपेण प्रसिद्ध्यति। स्वहर्षचरितटीकायां श्रीशङ्करः लिखति-'वाक्यं विवरणं वार्तिकञ्च, यत्करणात्कात्यायनो वार्तिककारः इत्युच्यते' इति। पुनश्च,

अस्मिन् प्रसङ्गे वाक्यवादविषयिण्यै विशेषप्रतिपत्तये अधोलिखिता सामग्री उपकाराय कल्पयितुमर्हति-

1. तत्तद्वैयाकरणानां स्फोटवादप्रसङ्गान्तर्गतः वाक्यसिद्धान्तविमर्शः अपि अनुध्यातव्यः।

2. अस्मिन् क्रमे मया सम्पादितः अनुदितश्च वाक्यवादः तथा तस्य भूमिकाभागोऽपि द्रष्टव्यः।[82]

3. हिन्दी-भाषानिबद्धः मम शोधलेखः 'वाक्यसिद्धान्त-एक दार्शनिक विवेचन' अपि परामर्ष्टव्यः।[83]

4. पुण्यराजेन एकोनषष्टि-कारिकासु वाक्यपदीयस्य द्वितीयकाण्डस्य यः विषयसारांशः प्रस्तुतः सोऽपि परिशीलनीयः वाक्यसिद्धान्तावबोधनाय।[84] तासां कारिकाणां विषये चर्चा अपि कालान्तरे करिष्यते एव इति शम्।

❖



## सन्दर्भाः

1. योगशिखोपनिषद्, 35.6
2. वाक्यपदीयम्, 1.73
3. काव्यादर्शः 1.4
4. वाक्यपदीयम् 1.123
5. अष्टाध्यायी 5.1.16
6. प्रदीपः पा. 5.1.16
7. महाभाष्ये पस्पशाह्निकम्
8. महाभाष्यम्, पा. 6.1.84
9. महाभाष्यम्, 1.1.1, पस्पशाह्निकम्
10. मैत्रेयोपनिषद् 6.22
11. शतपथब्राह्मणः 1.3.6.27
12. शतपथब्राह्मणः 5.1.5.5, 13.4.1.15
13. शतपथब्राह्मणः 3.1.3.22
14. तैत्तिरीयब्राह्मणः 1.3.4.5
15. ऐतरेयब्राह्मणः 6.3
16. शतपथब्राह्मणः 2.1.4.10, 14.4.1.23, 14.6.10.5
17. वृहदारण्यकोपनिषद् 1.3.21, 4.1.2
18. गोपथब्राह्मणः - पूर्वभागः 2.10
19. ऐतरेयब्राह्मणः 2.15.4.21
20. जैमिनीय-उपनिषद् 2.9.6
21. छान्दोग्योपनिषद् 6.3.2
22. ऋग्वेदः - 1.164.45, महाभाष्यस्य पस्पशाह्निकेऽपि उद्धृतम्
23. वाक्यपदीयम् - 1.144

24. महाभारतटीका, शान्तिपर्व - 232.24
25. महाभाष्यम्, 1.1.2, प्रत्याहाराह्निकम्
26. वाक्यपदीयम् 1.1.
27. श्रुतिमहती, रामकरणशर्मणोऽभिनन्दनग्रन्थः, भाग-1 प्रतिभाप्रकाशनम्, दिल्ली, 2008, पृ.290-301
28. अमरकोशः 1.6.2
29. अर्थशास्त्रम् 179
30. स्वोपज्ञवृत्तिः, शब्दशक्तिप्रकाशिका - 13
31. मीमांसारसपल्वलम्, वाक्यविचारः, पृ.34
32. मीमांसासूत्रम् 1.2.40
33. मीमांसासूत्रम् 3.1.20
34. मीमांसासूत्रम् 2.3.7
35. महावाक्यार्थप्रकरणम्, वेदान्तसारः
36. साहित्यदर्पणः 2.1
37. चन्द्रालोकटीका, पृ.8
38. वार्तिकम् 10, पा. 2.1.1
39. महाभाष्यम्, पा. 2.1.1, वार्तिकम् 10
40. वाक्यपदीयम् 2.4
41. काशिका, पा. 8.1.8
42. तर्कसंग्रहः, तर्कभाषा
43. तर्कसंग्रहः
44. वाक्यवृत्तिः - 4, पृ.20
45. तर्कदीपिका-4, पृ.32 तथा सिद्धान्तचन्द्रोदयः
46. रामरुद्री-कृष्णकान्ती टीका, शब्दशक्तिप्रकाशिका-13
47. स्वोपज्ञवृत्तिः, शब्दशक्तिप्रकाशिका-3



48. साहित्यदर्पणः 2.1
49. साहित्यदर्पणः, प्रथमः परिच्छेदः
50. तत्रैव
51. वाक्यपदीयम् 2.1-2
52. वाक्यपदीयम् 2.430
53. वाक्यपदीयम् 2.326
54. वाक्याधिकरणम्, श्लोकः-4
55. वाक्यपदीयम् 2.15
56. वाक्यपदीयम् 2.54
57. हरिवृत्तिः वाक्यपदीयम् 2.21
58. वाक्यपदीयम् 2.21
59. हरिवृत्तिः वाक्यपदीयम् 2.21
60. पुण्यराजः, वाक्यपदीयम् 2.13
61. प्रमाणवार्तिकम्, पृ.6
62. प्रमाणवार्तिकम्, पृ.128-129
63. स्फोटसिद्धिः, पृ.238-239
64. स्फोटसिद्धिः, पृ.239
65. वाक्यपदीयम् 2.50
66. वाक्यपदीयम् 2.50
67. वाक्यपदीयम् 2.50
68. वाक्यपदीयम् 2.52
69. वाक्यपदीयम् 2.30
70. वाक्यपदीयम् 2.41
71. वाक्यपदीयम् 2.17
72. वाक्यपदीयम् 2.411

73. वाक्यपदीयम् 2.47

74. श्लोकवार्त्तिकः, वाक्याधिकरणम्-49-54

75. पार्थसारथिमिश्रः, श्लोकवार्त्तिकः, वाक्याधिकरणम् 49-54

76. वाक्यपदीम् - 2.58

77. पुण्यराजः, वाक्यपदीयम् 2.6

78. वाक्यपदीयम् 3.1

79. वार्तिकम्, महाभाष्यम् 2.1.1

80. महाभाष्यम् 2.1.1

81. प्रदीपः, महाभाष्यम् 8.1.18

82. वाक्यवादः, सम्पादकः, अनुवादकः व्याख्याकारश्च बनमाली बिश्वालः, राष्ट्रिय-संस्कृत-संस्थानम्, गङ्गानाथ-झा-परिसरः चन्द्रशेखर आजाद पार्क, इलाहाबाद,2010

83. वाक्यसिद्धान्त-एक दार्शनिक विवेचन, बनमाली बिश्वालः, भारतीयमनीषादर्शन, हिन्दूस्तानी अकादमी, इलाहाबाद, 2009

84. भर्तृहरिप्रणीतं वाक्यपदीयम्, सम्पा. के.वी. अभ्यङ्करः, वी.पी. लिमाये, पुणे विद्यापीठम्, पुणे, 1965, परिशिष्टम्-2, पृ.193-196

❖



# आस्माकी यात्रा-संस्कृतिः

डॉ. रञ्जना कुमारी,
डॉ. अमरनाथ ठाकुरश्च

'चरैवेति चरैवेति' इति आद्यः ऋषि-निर्देशः। चरन्वै मधु विन्दति चरन् स्वादुमुदुम्बरम्। 'सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन्।।' इति ब्राह्मणग्रन्थस्योद्घोषः। 'शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः' इति गायति गीता। 'सुदूरमपि विद्यार्थी व्रजेद् गरुड़हंसवत्' इति शिक्षते शिक्षाग्रन्थ। 'नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।' इति स्मारयति सुभाषितम्। प्रस्थानपर्यायवाचिनां शब्दानां संकलनं करोति शब्दकोशः। गत्यार्थानां धातूनां बाहुल्यं प्रस्तौति धातु-पाठः। या प्रापणे धातोः ष्ट्रन् प्रत्यययोगेन स्त्रीत्वविवक्षायाम् अजाद्यतष्टाप् सूत्रेण 'यात्रा' शब्दं व्युत्पादयति व्याकरणम्। गमनोपयुक्तं शोभनं नक्षत्रं निर्धार्य दिक्शूलरहितं अर्थप्रहरापरिहृतं दक्षिणम्मुखचन्द्रस्थितं सिद्धामृतसर्वार्थसिद्धियोगयुक्तस्य दिनस्य अन्वेषणं कृत्वा सिद्धिप्रदं कामदं यात्राकालं निश्चिनोति ज्योतिष-शास्त्रम्। नासारन्ध्रे प्रवहमानं प्राणवायुमाधारीकृत्य इडां वामे पिङ्गलां दक्षिणे निर्धार्य चन्द्रस्वरः सूर्यस्वर इति स्वभावजं नामकरणं कृत्वा समं विषमं वा पादन्यासं निर्णीय आध्यात्मिकं यात्रा-विधानं वितनोति स्वर-शास्त्रम्। अकस्मात् समागतानां प्राणिनां प्राकृतिकोत्पातानां च क्षोदक्षेमं कृत्वा मङ्गलामङ्गलानां वस्तूनां दशा-दिशां च रहस्योद्घाटनं कृत्वा भविष्यं सूचयति शकुन-शास्त्रम्। देवानां राज्ञां च साङ्गोपाङ्गं यात्रा-प्रसङ्गं प्रस्तौति पुराणम्। रामादेः तपोवनादिगमनप्रसङ्गच्छलेन शुभशकुनैः प्रोत्साहितं माङ्गल्यद्रव्येण संस्कृतं निमित्तैः विलक्षणीकृतं वन्यैः पुष्पैः सुरभीकृतं यात्रावर्णनं विवृणोति वाल्मीकिः। भारतीयायाः यात्रायाः आदर्शरूपं मन्त्रयति महाभारतम्। कलरवीकृतं नायकानां यात्रा-कलेरवं काव्येषु कवयति महाकविः। सर्वेषु शास्त्रेषु काव्येषु च प्रसङ्गानुसारेण पल्लवितं यात्रा-वृत्तान्तं तथ्यं च प्रथयति ऋषीणां चिन्तनपद्धतिम्, आचार्याणां व्यवहारपद्धतिम्, भारतीयानां च पारम्परिकयात्रापद्धतिम्। नेदम् अद्यतनं बृहत्कलेवरं स्वानुभवेन प्रेरितं सतृणाभ्यवहारिणः

लेखकस्य यात्रावृत्तान्तम्। इदन्तु शास्त्रैः संस्कृतं मन्त्रैः प्रचोदितं शकुनैः शीतलीकृतं, निमित्तैःनुदितं, ज्ञानविज्ञानसमन्वितं लोकोपकारदृष्ट्या रचितं भारतीयां संस्कृतिं स्मारयत् काव्यस्याङ्गभूतं यथावसरं वर्णितं महापुरुषैरनुष्ठितमाशीर्वादैः सबलीकृतं, जीवनस्य आवश्यकाङ्गभूतम् अरोचकिनकविलेखनीप्रसूतं साहित्यम्। वर्णनेऽस्मिन् चकास्ति एका अभिनवा, अपूर्वा कौतूहलापूर्णा कल्याणपूर्णा सिद्धिप्रदा, कामदा अनुकरणीया च विश्वसाहित्ये सर्वथा दुर्लभा यात्रा-संस्कृतिः। सा संस्कृतिः या आभूषणवत् भास्वरास्ति। आराष्ट्रेऽनुष्ठानत्वात् राष्ट्रविशेषस्य समवेतत्वं च सूचयति। तिल-तण्डुलवद् वाङ्मये संसृष्टामिमां भास्वरां संस्कृतिं चेतुं समुद्यतमिदं शोध-पत्रम्।

उपलब्धस्य यात्रावर्णनस्य पर्यालोचनेन स्पष्टीभवति यात्रा-संस्कृतेः विभिन्नानि अङ्गानि। यथा यात्रा संकल्पः मनोद्वन्दः, यात्रानिर्णयः, शास्त्रानुसारेण कालनिर्णयः, देवद्विजगुरुप्राज्ञपूजनादिकमाशीर्वादग्रहणम्। मङ्गलकारकवस्तूनां स्थापनम्, जयावहस्य घोषस्य श्रवणम्, दानप्रदानम्, पाथेयप्रबन्धः, स्वरपरीक्षणम्, पादोत्थानम्, शकुनदर्शनम्, अङ्गादिविस्फुरणरूपं निमित्तमीमांसा, विदायाचना, अनुगमनम्, मनसः प्रसन्नता इत्यादयः।

यात्रायाः प्रथमोपक्रमः वर्तते-यात्रासंकल्पः। संकल्पः कर्ममानसः मनसा गमनस्य स्थिरीकरणम्। यात्राप्रसङ्गे संयाते बहुविधं मनोद्वन्द्वः चेतसि उद्वेगं जनयति। सीतान्वेषणाय गन्तुकामः गगनगतिः हनुमान् सीताविषयिणीं समुद्रसम्बन्धिनीमनागत-संकटापन्नां बहुविधां चिन्तां करोति। तस्य मनोद्वन्द्वस्य शमनं यदा संपातिद्वारा भवति तदैव-

**सः सूर्याय महेन्द्राय पवनाय स्वयम्भुवे।**
**भूतेभ्योऽञ्जलिं बद्ध्वा चकार गमने मतिम्।**[1]

हर्षचरिते हर्षवर्धनं प्रति प्रस्थातुकामः बाणः शतधा चिन्तया पीडितः प्रतिभाति। स्वयमेव वर्णयति-**किं करोमि? अन्यथा सम्भावितोऽस्मि राज्ञा। निर्निमित्तबन्धुना च कृष्णेन। कष्टा च सेवा। विषमं भृत्यत्वम्। अतिगम्भीरं महद्राजकुलम्। न च मे पूर्वपुरुषप्रवर्तिता प्रीतिः। न कुलक्रमागता गतिः। नोपकार-स्मरणानुरोधः। न बालसेवास्नेहः। न गोत्रगौरवम्। न पूर्वदर्शनदाक्षिण्यम्। न प्रज्ञासंविभागप्रलोभनम्। न विद्यातिशयकुतूहलम्। नाकारसौन्दर्यादरः। न सेवाकाकुकौशलम्। न विद्वद्गोष्ठीबन्धवैदग्ध्यम्। न वित्तव्ययवशीकरणम्। न राजवल्लभपरिचयः। अवश्यं गन्तव्यञ्च। सर्वथा भवानीपतिर्भुवनपतिर्गतस्य मे शरणम्। सर्वं साम्प्रतम् आचरयिष्यामीति इत्यवधार्य गमनाय मतिमकरोत्।**[2] इदं मनोद्वन्द्वग्रस्तं यात्रावर्णनं सुदुर्लभमन्यत्र।



राजा दिलीपः रघुवंशस्थः समृद्धं राज्यं प्रभुत्वं मनोवृत्तानुसारिणीं पत्नीं च प्राप्यापि कदा मे पुत्रो भविष्यति इति चिन्तया खिन्नः सन् कालं यापयति स्म। सन्तानहीनस्य पुत्रस्य पितरः कथं खिन्नाः भवन्ति इति सततं स्मरति स्म। गुरोः समीपे स्वकीयं मनोद्वन्द्वं प्रकटयति-

**किन्तु वध्वां तवैतस्यामदृष्टं सदृशप्रजम्।**
**न मामवति सद्वीपा रत्नसूरपि मेदिनी।।**
**नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः।**
**न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः।।**
**मत्परं दुर्लभं मत्वा नूनमावर्जितं मया।**
**पयः पूर्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते।।**
**लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम्।**
**संततिः शुद्धवंश्या हि परत्रेह च शर्म्मणे।।**[3]

इदृशेन संतापेन सन्तप्तः सम्राट् गुरोराश्रमं गन्तुं संकल्पं चकार।

पतिगृहं हस्तिनापुरगमनकाले कीदृशी खिन्ना संशयशीला, मनोद्वन्द्वग्रस्ता चासीत् सा शकुन्तला स्वयमेव स्वनति-'अनेन वां सन्देशेन कम्पितं मे हृदयम्।[4] न केवलं स्वतन्त्रः कर्त्ता मनोद्वन्द्वग्रस्तः भवति अपितु प्रयोजककर्तुश्च चित्तं चञ्चलं प्रतिभाति। सोमतीर्थतः स्वसुः प्रतिकूलं भाग्यमनुकूलय्य प्रतिनिवृत्तः कण्वः छन्दोमयीमाकाशवाणीं श्रुत्वा सत्त्वापन्नां पुत्रीं ज्ञात्वा तत्क्षणमेव पुत्र्याः पतिगृहं प्रेषणस्य निश्चयं करोति।' 'अद्यैव त्वाम् ऋषिपरिरक्षितां कृत्वा भर्तुः सकाशं विसर्जयामि।' किन्तु भारतीयसंस्कृतेः स्तम्भीभूतस्य वेदविद्याव्रते स्नातस्य कुलपतेः कण्वस्य दृष्टिः चिन्तया जडीभवति। कण्ठ : स्तम्भितवाष्पवृत्त्या कलुषः भवति। मनः विकलतां प्राप्नोति। हृदयमुत्कण्ठया वेदनया च सम्यक् आक्रान्तः अस्ति।[5]

मेघदूते स्वयंगमनेऽशक्तः मेघस्य दौत्यकर्मणे प्रेरकः यक्षः चिन्तया कीदृशः खिन्नः आसीत् यत् कनकवलयरिक्तहस्तप्रकोष्ठः संजातः स प्रत्यग्रैः कुटजकुसुमैः तस्मै मेघाय अर्घ्यं ददाति। प्रसन्नो भूत्वा प्रीतिप्रमुखवचनेन तस्य स्वागतं करोति। 'मन्दायते न खलु सुहृदामभ्युपेतार्थकृत्याः' इत्युपदिशति। तस्य कैलासपर्यन्तं सहचरस्य, पाथेयस्य, विश्रामस्य च व्यवस्थां करोति। प्रयाणानुरूपं मार्गं शिक्षयति। नयन-तोषकस्य अदृश्यस्य स्थानस्य कौतूहलं श्रावयति। ततः श्रोत्रपेयं सन्देशं स्वनति।

यात्राकाले ऊहापोहात्मकं चिन्तनं तु स्वाभाविकमेव सर्वैरनुभूयते। अतः अस्मिन् यात्रावर्णने वर्णितमस्ति। तस्यैव शमनाय सन्तः शास्त्रीयं यात्रा-सोपानं निर्मान्ति मङ्गलजनकवस्तुनः स्थापनं करोति। देवनमस्कारस्य वृद्धोपसेवनस्य आशीर्वादग्रहणस्य जयावहस्य नादस्य मन्त्रपाठस्य चाचर ार्गं प्रशस्तीकरोति। यतः मनसः प्रसन्नता एव कल्याणकार्याः यात्रायाः रहस्यम्। सति शुभदिने नक्षत्रे खिन्नमनसः यात्रिणः यात्रा लक्ष्यसाधिका न भवति। कथितं च-'**चित्तस्य कालुष्यकरञ्च सर्वं गन्तुं प्रयाणप्रतिषेधनाय।**'[6] **पुराणे रामोऽपि-'गन्धञ्च हीरकं रत्नं ददर्श दक्षिणे शुभम्। सुगन्धिवायोराघ्राणं प्राप विप्राशिषं शुभम्।' 'इत्येवं मङ्गलं ज्ञात्वा प्रययौ स मुदान्वितः।'**[7] अतएव कथ्यते-'प्रस्थितोऽपि न गन्तव्यं यदि स्याद् गर्हितं मनः। मनसः प्रसन्नता एव निर्णायिका भवति यात्रायाः।'

गीता उद्गिरति-"तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थिते। ज्ञात्वा शास्त्र-विधानोक्तं कर्म कर्तुमिहार्हसि।"[8] अतः भगवता कृष्णेन प्रेरितः प्रयाता प्रथमतः शास्त्रेषु अक्षीभूतं ज्यातिष-शास्त्रमङ्गीकरोति। कोऽपि गमनोत्सुकः मनसा निश्चयं कृत्वा यात्राक्षणस्य निश्चयार्थं ज्योतिषिणं प्रतिं प्रचलति। देवज्ञः वारतिथिनक्षत्रयोगकरणानां गणनां कृत्वा सिद्धिप्रदस्य श्रेयस्करस्य दिनस्य क्षणस्य च निर्णयं कृत्वा यात्रायाः द्वितीयमङ्गलं करोति। जानन्ति आस्तिकाः यत् शुभतिथेः ज्ञानेन चञ्चला लक्ष्मीः सुस्थिरा भवति। सुविज्ञातः वारः विवर्धयति आयुः। नक्षत्रं जानताऽजानता वा कृतस्य पापस्य शमनं करोति। योगः स्वजनस्य वियोगमपहन्ति। करणं चिन्तितमचिन्तितं कल्पितमतर्कितमभीष्टं सम्पादयति। उक्तमेव-

**लक्ष्मीः स्यादचला तिथिश्रवणतो वारात्तथायुश्चिरम्।**
**नक्षत्रं कृतपापतापशमनं योगोवियोगापहः।।**
**सर्वाभीष्टकरन्तथैव करणं पञ्चाङ्गमेवं स्फुटम्।**
**श्रोतव्यं गणकाननात् प्रतिदिनं श्रेयस्करं सिद्धदम्।।**[9]

वेदात् प्रसृता इयं नक्षत्रविद्या रहस्यपूर्णा दुर्बोध्या कठिनास्ति न सामान्य-शिक्षितानां कृते सहजोपकारिणी। अतएव ज्योतिष-धुरन्धरः वराहमिहिरः ज्योतिषां ग्रहशास्त्राणां सारमुधृत्य यत्नतः माहेन्द्रादियोगचक्रस्य निर्माणं कृतवानस्ति। चतुष्टयस्यास्य चक्रस्यानुष्ठानेन प्राप्तव्यस्य फलस्योल्लेखं कुर्वता कथितम्-

**माहेन्द्रे विजयो नित्यममृते कार्यशोभनम्।**
**वक्रे कार्यविनाशः स्यांत् शून्ये च मरणं ध्रुवम्।।**[10]



चतुर्धा विभक्तमिदं चक्रं सामान्यकृतश्रमाणां कृतेऽपि बोधगम्यं लाभप्रदं करणीयं चास्ति।

कृतयात्रानिश्चयः मुहूर्तज्ञः रामः लंकागमनोत्सुकं हनुमन्तं प्रयाणाय प्रेरयन् नक्षत्र-विद्यायाः उद्धरणं ददाति।

**मुहूर्त्तेन च युक्तेन प्रस्थानमभिरोचय। युक्तो मुहूर्त्ते विजये प्राप्तो मध्यं दिवाकरः।**
**उत्तरफाल्गुनी ह्यद्यश्वस्तु हस्तेन योक्ष्यते। अभिप्रयाम सुग्रीवसर्वानीकसमावृतः।।**[11]

ब्रह्मवैवर्तः विशदयति ज्योतिषसम्मतं यात्राक्षणं कृष्णस्य-

**तृतीयप्रहरेऽतीते निशायाञ्च शुभक्षणे। शुभचन्द्रर्क्षयोगे तु चामृतयोगसमन्विते।**
**सौम्य स्वामियुते लग्ने सौम्यग्रहविलोकने। पापग्रहसमासक्तदृष्टदोषादिवर्जिते।।**[12]

बाणभट्टोऽपि-**मौहूर्तिकमतेन कृतनक्षत्रदोहदः**[13] **शोभने मुहूर्त्ते यात्रायाः श्रीगणेशं करोति।**

यात्रासंस्कृतेः विशिष्टमङ्गमस्ति शुभजनकद्रव्यदर्शनम्। प्रसन्नताविवर्धकस्य वस्तुनः विधानं संकलयति समयप्रदीपः-

**"धेनुर्वत्सप्रयुक्ता वृषगजतुरगा दक्षिणावर्तिवह्निर्दिव्यस्त्रीपूर्णकुम्भा द्विजनृप-गणिका पुष्पमाला पताका। सद्योमांसं घृतं वा दधि मधु रजतं काञ्चनं शुक्ल-धान्यं दृष्ट्वा श्रुत्वा पठित्वा फलमिह लभते मानवः गन्तुकामः।"**[14]

ब्रह्मवैवर्तपुराणे वर्णितमस्ति गोरोचनादेर्माङ्गल्यम् भगवतः रामस्य लंकागमनकाले-

**"गच्छन् ददर्श रामेशो यात्रामङ्गलसूचकम्। दुग्धां रोचनामाज्यममृतं पायसं तथा।। शालग्रामं पक्वफलं स्वस्तिकं शर्करा मधु। मार्ज्जारञ्च वृषेन्द्रं च मेघपर्वतमूषिकम्।। मेघाच्छन्नस्य च रवेरुदयं चन्द्रमण्डलं कस्तूरी कज्जलं तोयं हरिद्रां तीर्थमृत्तिकाम् सिद्धान्नं सर्षपं विप्रबालञ्च बालिकाम्।"**[15]

बाणोऽप्रदक्षिणीकृत्य प्राङ्मुखीं नैचिकीम्, शुक्लाङ्गरागः, शुक्लमाल्यः शुक्लवासाः रोचनाचित्रदूर्वाग्रपल्लवग्रथितगिरिकर्णिकाकुसुमकृतकर्णपूरः शिखासक्तसिद्धार्थकः कृतसकलगमनमङ्गलः हरितगोमयोलिप्ताजिरस्थण्डिलस्थापितमसितेतर-कुसुममाला-परिक्षिप्तकण्ठं दत्तपिष्टपञ्चङ्गुलपाण्डुरं मुखनिहितनवपल्लवं पूर्णकलशमीक्षमाणः[16] पथि पादन्यासं करोति।

कृष्णोऽपि पुराणे मात्रा यशोदया सम्पादिते मङ्गलविन्यासे-

**प्रक्षाल्य पादयुगलं धृत्वा धौते च वाससी।**
**उवास संस्कृते स्थाने विलिप्ते चन्दनादिना।।**
**फलपल्लवसंयुक्तं संस्कृतं चन्दनादिभिः।**
**वामे कृत्वा पूर्णकुम्भं वह्निं विप्रं स्वदक्षिणे।।**
**पतिपुत्रवतीं दीपं दर्पणं पुरतस्तथा।**
**दुर्व्वाकाण्डञ्च सुस्निग्धं पुष्पं धान्यं सितं शुभम्।**
**गुरुदत्तं गृहीत्वा च प्रददौ मस्तकोपरि।।**
**धृतं ददर्श माध्वीकं रजतं काञ्चनं दधि।**
**चन्दनं लेपनं कृत्वा पुष्पमालां गले ददौ।।"**[17]

कीदृशी पुष्पिता पल्लविता सुगन्धिता परिष्कृता पर्यावरणेन प्रहर्षितास्ति आस्माकी यात्रापद्धतिः।

यात्राकाले कल्याणकरस्य निनादस्य श्रवणमपि शुभं जनयति। वर्णयति वसन्तराज-शाकुनम्।

**गान्धारषड्जावृषभस्तथान्ये। स्वरेषु गम्भीरमनोरमा ये।**
**वादित्रवेदध्वनिगीतनृत्यमित्यादिशस्तं किल यत्र रौद्रम्।।**[18]

रणोन्मुखः रामः मङ्गलं दृष्ट्वा वैरिसंक्षयसूचकं विजयप्रदं निनादं शृणोति- "यात्राकाले च पुरतः शुश्राव सहसा मुनिः। हरिशब्दं शङ्खं घण्टादुन्दुभिवादनम्।। आकाशवाणीं सङ्गीतां जयस्ते भवितेति च। नरोक्तं तच्च कल्याणं मेघशब्दं जयावहम्।। चकार यात्रां भगवन् श्रुत्वेत्येनं विधं शुभम्।"[19] समराङ्गणोन्मुखः कुम्भकर्णः शंखदुन्दुभिनिर्घोषं विजयप्रदमम्बुदस्वनं शृण्वन् गृहात् प्रचलितः। किन्तु पुरतः मरणसूचकं **'घोररूपा शिवा सज्वालकवलैर्मुखैरमङ्गलं निनादं कर्तुमारभत।'**[20] रावणोऽपि-**"आर्त्तानां राक्षसीनान्तु लङ्कायां वा कुले-कुले। रावणः करुणं शब्दं शुश्राव परिदेवितम्।"** मरणसूचकं स्वरं शृण्वन् प्रस्थानं करोति।

मथुरामभिप्रयातः कृष्णोऽपि पादन्यासपूर्वम्-

**शंखध्वनिं वेदपाठं सङ्गीतं मङ्गलाष्टकम्।**
**विप्राशीर्वचनं रम्यं शुश्राव परमादरम्।।**[21]

धूमोज्योतिःसलिलमरुतां सन्निपातः अचेतनः मेघोऽपि वामभागस्थस्य गर्वितस्य चातकस्य सिद्धिदं नादं शृण्वन् अग्रेसरो भवति। **वामश्चायं नदतिमधुरः चातकस्ते सगन्धः।**[22] रोगिणं प्रति प्रयातस्य वैद्यस्य पुरतः यदि शिखी-हय-गज-गोधा-रासभभृङ्गाः, पिकः, कपोतः पोतकी शुकरी विहगराजः वामतः वदति स मङ्गलाशंसी स्वरः भवति।

**शिखिहयगजगोधा रासभभृङ्गराजो मुखरपिक कपोतो पोतकी शूकरी वा।**
**तदनु विहगराजो मङ्गलाशंसिनः स्युर्वदति शकुनवेत्ता वामतः निर्गमे वा।।**[23]

बाणस्तु प्रास्थानिकानि सूक्तानि मन्त्रपदानि च बहुशः[24] समावर्त्य प्रस्थानं करोति। गमनकाले यदि कोऽपि पृष्ठतः कुत्र गच्छसीति पृच्छति सा उत्साहप्रदा यात्रा न भवति। किन्तु, यदि कोऽपि स्नेहशीलः स्वजनः पृष्ठतः गच्छ गच्छेति उच्चरति उत अग्रतः आगच्छ आगच्छेति आकारयति तर्हि यात्रा सुखदा सिद्धिप्रदा च भवति। यौरोपिकाः गमनकाले टा-टा इति उच्चारयन्तः हस्तं दोधूय गन्तुरात्मबलं पुष्टीकुर्वन्ति। उक्तं च शाकुने-"गच्छेति पृष्ठे पुरतः तथैव वागीदृशी केनचिदुच्यमाना सर्वाशिषश्चातिशयेन ताभ्यश्चित्तस्य तुष्टिर्विजयाय पुंसाम्।" स्वरं विवेचयन् एकत्रोक्तम्-

**सिद्धौ विरावा जहि छिन्दि भिन्दि चेत्यादयः शत्रुवधोद्यतानाम्।**
**क्व यासि मा गच्छत चैवमाद्या प्रयोजनारम्भनिवारणार्थाः।।**[25]

आशीर्वादैः स्नाता आस्माकी यात्रा-संस्कृतिः। देशोऽयमभिवादनशीलस्य नित्यं वृद्धोपसेविनां वर्तते। अतः आयुर्विद्यायशोबलं प्राप्तुकामः प्रयाता ज्यायानभिवाद्यैव यात्रां करोति। वनगमनकाले रामः पितुः चरणौ पतित्वा आशीर्वादान्वितो भवति। लिखति महाकविः भासः-

**समं बाष्पेण पतता तस्योपरि ममाप्यधः।**
**पितुर्मे क्लेदितौ पादौ ममापि क्लेदितं शिरः।।**[26]

स्नेहशीला कौसल्या बहुविधमाशीर्वादं ददाति रामाय रामायणे-

पितृशुश्रूषया पुत्र मातृशुश्रूषया तथा। सत्येन च महाबाहो चिरंजीवाभिरक्षितः। समित्कुशपवित्राणि वेद्यश्चायतनानि च। स्थण्डिलानि च विप्राणां वृक्षा क्षुपाह्रदाः। पतङ्गाः पन्नगा सिंहास्त्वां रक्षन्तु नरोत्तम।

दिनानि च मुहूर्ताश्च स्वस्ति कुर्वन्तु ते सदा। श्रुतिः स्मृतिश्च धर्मश्च पातु त्वां पुत्र सर्वतः।[27] एवं बहुविधं सर्गद्वयव्यापिनमाशीर्वादं ददाति। आशीर्वादस्य आदर्शरूपमत्र प्रस्तुतम्।

कृष्णोऽपि **"विप्राशीर्वचनं रम्यं शुश्राव परमादरम्।"** पश्चादेव पदमुद्वहति। दत्ताशीर्वादो बान्धववृद्धाभिः अभिनन्दितः परिवरजरतीभिः बाणः यात्रां करोति। पतिगृहप्रस्थितां शकुन्तलां कण्वः अपघ्नन्तो दुरितं हव्यगन्धैः वैतानस्त्वां वह्नयः पावयन्तु। ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव, पुत्रं त्वमपि साम्राज्यं पुरुमवाप्नुहि।

इति आशीर्वादं वरदानं वा ददाति। वन्यानां प्रतिनिधिः कोकिलः मङ्गलप्रार्थनां कुर्वन् कर्णप्रियं कलरवं व्यनक्ति।

**रम्यान्तरः कमलिनीहरितैः सरोभिश्च्छायाद्रुमैर्नियमितार्कमरीचितापः।**

**भूयात् कुशेशयरजोमृदुरेणुरस्याः शान्तानुकूलपवनश्च शिवश्च पन्थाः।।**[28]

यक्षः अलकाप्रस्थितं मेघं प्रति आशीर्वादम् अभिव्यनक्ति। **"इष्टान्देशान् जलद विचर प्रावृषासम्भृतश्रीर्माभूदेवं क्षणमपि च ते विद्युता विप्रयोगः।"** (उ.मे.52)

आशीर्वादस्य प्रसङ्गे शिरसः आघ्राणस्य परंपरा परिदृश्यते। विश्वामित्रेण सह गच्छतः रामस्य शिरसः आघ्राणं करोति राजा दशरथः।

**कृतस्वस्त्ययनं मात्रा पित्रा दशरथेन च। पुरोधसा वशिष्ठेन मङ्गलैरभिमन्त्रितः।**

**स पुत्रं मूर्ध्न्युपाघ्राय राजा दशरथस्तदा। ददौ कुशिकपुत्राय सुप्रीतेनान्तरात्मना।।**[29]

वनगमनकाले कौसल्या शिरः जिघ्रति पुत्रस्य–**"आनम्य मूर्ध्नि चाघ्राय परिष्वज्य यशस्विनी। अवदत् पुत्रमिष्टार्थो गच्छ राम यथासुखम्।"**[30] लब्धसंज्ञः दशरथः पुत्रवधूं भूषयित्वा भुजाभ्यां परिष्वज्य मूर्ध्नि उपाघ्राय गमनाय स्वीकृतिं ददाति। **"तां भुजाभ्यां परिष्वज्य श्वश्रूर्वचनमब्रवीत्। अनाचरन्तीं कृपणं मूर्ध्न्युपाघ्राय मैथिलीम्।"**[31] सुमित्रापि स्वसुतस्य शिरः जिघ्रति–

**"तं वन्दमानं रुदती माता सौमित्रमब्रवीत्।**

**हितकामा महाबाहुं मूर्ध्न्युपाघ्राय लक्ष्मणम्।।"**[32]

यात्रा–संस्कृतेरनिवार्यमङ्गमस्ति–आपृच्छा, प्रस्थानयाचना। वृद्धैः वयस्कैः वानुज्ञातैव यात्रा कर्त्तव्या इति पुरातनी यात्राशैली। भारतीयसंस्कृतेः स्तम्भभूते रामायणे वनगमनापृच्छा नामा एकः स्वतन्त्रः सर्गः सृष्टः प्रचेतसा। प्रस्थानकाले "अथ रामश्च सीता च लक्ष्मणश्च। उपसंगृह्य राजानं चक्रुर्दीनाः प्रदक्षिणम्।" उक्तं च–आपृच्छे त्वां महाराज सर्वेषामीश्वरोऽसि नः। प्रस्थितं दण्डकारण्यं पश्य त्वं कुशलेन माम्।[33] माता स्वीकृतिं ददती वक्ति–यदि ते गमने बुद्धिः कृता पितुरपेक्षया। **गच्छ पुत्र त्वमेकाग्रो भद्रं तेऽस्तु सदा विभोः।**[34] प्रस्थानसमये पौराणां महान् सम्मर्दः आसीत् **"रुदिताश्रुपरिद्यूनं हा हा कृतमचेतनम्। प्रयाणे राघवस्यासीत् पुरं परमपीडितम्।"**[35] पुराणे कृष्णोऽपि "गुरुवर्गं ब्राह्मणञ्च वन्दयामास भक्तितः"[36] सम्पाद्य आपृच्छति गमनाय। स्वप्नवासवदत्ते नाटके तपोवनतः गन्तुकामः ब्रह्मचारी "आपृच्छामि भवन्तौ" इत्युच्चरन् काञ्चुकीयतः यौगन्धरायणतः च प्रस्थानयाचनां



करोति। परिव्राजकवेषधारी जिगमिषुः यौगन्धरायणोऽपि कञ्चुकिनं पृष्ट्वैव अहमपि गन्तुमिच्छामि। 'गच्छ पुनर्दर्शनाय'[37] लब्धाज्ञः एव बहिस्संसरति।

शाकुन्तले शकुन्तलापि पितुरङ्कमाश्लिष्य 'कदा नु खलु भूयस्तपोवनं प्रेक्षिष्ये' इति गमनपृच्छां करोति। कण्वोऽपि **'शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्'**[38] कथयित्वा प्रयाणसम्मतिं प्रकटयति। दूते काव्येऽचेतनः मेघोऽपि स्वकीयं प्रियसखं तुङ्गं रामगिरिमालिङ्ग्य आपृच्छ्य उदङ्गमुखमुत्पतति। **"आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलम्। वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु"**[39] कुम्भकर्णोऽपि-

**भ्रातरं स परिष्वज्य कृत्वा चापि प्रदक्षिणम्।**

**प्रणम्य शिरसा तस्मै प्रतस्थे स महाबलः।।**

**निष्पतन्तं महाकायं महानादं महाबलम्।**

**तमाशीर्भिः प्रशस्ताभिः प्रेषयामास रावणः।"**[40]

विवृणोति बाणः–शकुनं गमनस्य उत्साहं वर्धयति। यतः शकुनेन शक्यते ज्ञातुं शुभाशुभम्। अकस्मात् समागताः शकुनाः (पक्षिणः) भविष्यवक्तारः भवन्ति। माङ्गल्यद्रव्याणां संग्रहणं तु प्रयाससाध्यम्। किन्तु अतर्किताः सम्मुखीभूताः पशुपक्षिणः प्राकृतिकोत्पातः शकुनशास्त्रस्य विषयो भवति। अस्य विशदं रहस्यपूर्णं कौतूहलवर्धकं च विवेचनं यात्राप्रसङ्गे प्राप्यते।

विश्वामित्रेण सह गच्छतः रामस्य पुरतः शीतलः मन्दः सुगन्धितः वायुरकस्मात् वाति–

**"ततो वायुः सुखस्पर्शो नीरजस्को ववौ तदा।**

**विश्वामित्रगतं रामं दृष्ट्वा राजीवलोचनम्।।**

**पुष्पवृष्टिर्महत्यासीद्देवदुन्दुभिनिःस्वनैः ।**

**शंखदुन्दुभिनिर्घोषः प्रयाते तु महात्मनि।।"**[41]

लङ्कोन्मुखः निमित्तज्ञः रामः उपस्थितानि शकुनानि दृष्ट्वा वक्ति–

**निमित्तानि निमितज्ञो दृष्ट्वा लक्ष्मणपूर्वजः।**

**सौमित्रिं संपरिष्वज्य इदं वचनमब्रवीत्।।**

**लोकक्षयकरं भीमं भयं पश्याम्युपस्थितम्।**

**निर्वहणं प्रवीराणामृक्षवानररक्षसाम्।।**

**वाताश्च कलुषा वान्ति कम्पते च वसुन्धरा।**

**पर्वताग्राणि वेपन्ते पतन्ति च महीरुहाः।।**

**दीनाः दीनस्वराः क्रूराः सर्वतो मृगपक्षिणः।**

**प्रत्यादित्यं विनर्दन्ति जनयन्तो महद्भयम्।।**

**काकाः श्येनास्तथा गृद्धाः नीचैः परिपतन्ति च।**

**शिवाश्चाप्यशुभान्नादान्नदन्ति सुमहान् भयान्।।**

इत्युक्त्वा संग्रामहर्षणः धन्वी स रामः लंकाभिमुखं प्रतस्थे।[42]

कुम्भकर्णस्य प्रयाणकाले कीदृशानि दुःखदानि निमित्तानि उपस्थितानि पश्यन्तु-

"सर्पैरुष्ट्रैः खरैश्चैव सिंहद्वीपमृगद्विजैः। अनुजग्मुश्च तं घोरं कुम्भकर्णं महाबलम्। तस्य निष्पततस्तूर्णं कुम्भकर्णस्य धीमतः। बभूवुर्घोररूपाणि निमित्तानि समन्ततः। उल्काष्ठानियुता मेघा बभूवुर्गर्दभारूणा। ससागरवनाचैव वसुधा समकम्पत। घोररूपा शिवा नेदुः सज्वालकवलैर्मुखैः। मण्डलान्यपसव्यानि बबन्धुश्च विहंगमाः। निष्पपात च गृद्धोऽस्य शूले वै पथि गच्छतः। प्रास्फुरन्नयनं चास्य सव्योबाहुरकम्पत।। तथापि कृतान्त बलचोदितः"[43] कुम्भकर्णः निर्ययौ एव रणाङ्गणम् मृत्युमङ्गीकर्तुम्।

यात्रा-सिद्धान्ते मङ्गलसूचकानां तत्त्वानां महती सूची संकलितास्ति। यथा-वामे मधुरवाक्पक्षी वृक्षपल्लवितोऽग्रतः। अनुकूलो वहन्वायुः प्रयाणे शुभशंसिनः[44] दृष्टे शवे रोदनशब्दहीने महार्थसिद्धः कथितोद्यमेषु। गृहप्रवेशे शवः शवत्वं रुजं सदीर्घामथवा ददाति।[45] कीदृशं मनोभावेन भविष्येण च बद्धमस्ति पर्यावरणं प्रदर्शयति यात्रा-विज्ञानम्।

सुखकरी यात्रा अपेक्षते पुष्टं पाथेयम्। यक्षः दौत्यकर्मणे मेघं प्रेरयन् पाथेयवतः सहचरस्य सम्पादनं करोति। आकैलासाद् विसकिसलयच्छेदपाथेयवन्तः संपत्स्यन्ते नभसि भवतः राजहंसाः सहायाः।[46] गुरोराश्रमप्रस्थितं राजानं दिलीपं जलपानाय प्रत्यग्रेण नवनीतेन घोषवृद्धाः उपहारीकुर्वन्ति। हैयङ्गवीनमदाय घोषवृद्धानुपस्थितान्। रामायणे सीतान्वेषणाय सर्वदिक्षु प्रसृता वानराः पाथेयसंग्रहेऽपि सन्नद्धाःसन्ति-

अन्ननिस्यन्दजातानि मूलानि च फलानि च। अमृतस्वादकल्पानि ददृशुस्तत्र वानराः। तदन्नसंभवं दिव्यं फलमूलं मनोहरम्। यः कश्चित्सकृदश्नाति मासं भवति तर्पितः। तानि मूलानि दिव्यानि फलानि च फलाशनाः। औषधानि च दिव्यानि जगृहुर्हरिपुंगवः।[47]

**पाद-प्रक्षेपः**-स्वरशास्त्रं नासारन्ध्रयोः प्रवहमानं वायुमाधारीकृत्य यात्रायां प्रथमं पादन्यासस्य विधानं वितनोति। लोके प्रचलितमाभाणकमस्ति-

**जो स्वर चलै तासु पग दीजै। कालहु से एक टक्कर लीजै।**

स्वरज्ञोऽपि स्वरयति-वामे च दक्षिणे च यत्र संक्रमते शिवः। कृत्वा तत्पादमादौ



च यात्रा भवति सिद्धिदा।[48] नासिकायाः वामरन्ध्रे प्रवहमानः वायुः चन्द्रस्वरः कथ्यते। चन्द्रस्वरे शरीरस्य स्थितिः शीतला भवति। मनः प्रसादत्वं भजते। मुखं सौम्यं दृश्यते। प्रवृत्तिः आह्लादयुक्ता भवति। अस्मिन् स्वरे कृतयात्रः यात्री अन्यैः कृतमपराधमपि न गणयति। शरीरे सहनशक्तेः प्राबल्यं भवति। अतएव दूर-देशस्य यात्रा चन्द्रस्वरे कर्त्तव्या। स्वरपण्डितः पाठयति-दूराध्वने शुभश्चन्द्रः[49] निर्विघ्नोऽभीष्टसिद्धिदः। दूराध्वगमने चन्द्रः। दूरदेशे विधातव्यं गमनं तु हिमद्युतौ। गृहान्निर्गते चन्द्रः स्वरः शुभः भवति। तत्रैव गृहप्रवेशकाले सूर्यस्वरः श्रेयस्करः।

चन्द्रस्वरे प्रचलिते "चन्द्र समपदः कार्यः" इति वचनेन द्वौ वा चतुरो वा वाम-चरणोत्थानं कृत्वा यात्रा कर्त्तव्या। तत्रैव सूर्यस्वरे विषमं एकवारं त्रिवारं वा पादोत्थानं श्रेयस्करम्। **"चन्द्रः समपदः कार्यो रविस्तु विषमः सदा। पूर्णपादं पुरस्कृत्य यात्रा भवति सिद्धिदा।।"**[50] क्रूरकर्मणः कृते सूर्ये स्वरे प्रस्थानं प्रशस्तम्। चन्द्रस्वरे सौम्यकर्मणे यात्रा भवति। शुक्लपक्षे चन्द्रस्वरः चमत्कारकः भवति।

**"गुरुशुक्रबुधेन्दूनां वासरे वामनाडिका। सिद्धिदा सर्वकार्येषु शुक्लपक्षे विशेषतः।।"**[51] कृष्णपक्षे सूर्यस्वरः सशक्तः भवति। स्वराश्रया यात्रा स्वाभाविकी यात्रा भवति। वारतिथिनक्षत्रादीनां गणनाया अत्र नावश्यकता। यात्रायाः सर्वमङ्गं सम्पाद्य यदा गृहं त्यक्त्वा मार्गे प्रथमं पादन्यासं करोति तत्र नासिका परीक्षणीया भवति। दीर्घनासिकः देवः गजाननः स्मर्तव्यश्च। किन्तु वयन्तु दीर्घनासिकं देवं स्मरामः श्लोकं पठामः। स्वकीयां नासिकां न जानीमः।

यात्रा वर्णनेऽस्य स्पष्टमुल्लेखो समुल्लसति। लोके प्रचलितमस्ति-'सोमे शुक्रे बुधे वाम। एहि विधिलंका जीतल राम। कृष्णोऽपि मधुरां गच्छन् नानुरूपं पादन्यासं करोति। उत्कञ्च-विधृत्य नासिका वामभागं मध्यमया विभुः। विसृज्य वायुमिष्टञ्च नासा दक्षिणरन्ध्रतः।। चिक्षेपदक्षिणं पादं सुन्दरं स्वात्मविग्रहम्। ततो ययौ नन्दनन्दो नन्दस्यप्राङ्गणवरम्।। 'बाणभट्टोऽपि सूर्यस्वरे प्रथमचलितदक्षिणचरणः प्रीतिकूटान्निरगात्' इति लिखति।

आनन्दपूर्णायाः यात्रायाः कृते छायावदनुगम्यमानस्य मनोवृत्तानुसारिणः सहचरस्य आवश्यकता प्रतिभाति। संस्कृतिस्तु शिक्षयति-'**अति कापुरुषो मार्गे द्वितीयः क्षेमकारकः। कर्कटेन द्वितीयेन जीवितं परिरक्षितम्।।**'[52] नीति-शास्त्रं निर्दिशति-'एको न गच्छेदध्वानम्' लौकिकी परंपरास्ति यत् यदि कोऽपि सहायकः यात्रायां न भवेत् तर्हि लगुडमेव द्वितीयं कृत्वा यात्रा प्रकर्त्तव्या। तीर्थस्थलो एकाकी गमनेन गन्ता न तीर्थफलमश्नुते। अतः पत्नीद्वितीयेनैव गमनं शास्त्रसम्मतम्।

पञ्चतन्त्रे एका स्त्रेशंकिनी माता प्रस्थिताय एकाकिने पुत्राय मार्गे रक्षकरूपमेकं कर्कटं ददाति। कालिदासः मेघमलकां प्रेषयन् सहायकरूपेण मानसोन्मुखं राजहंसं सङ्गीकरोति। शकुन्तला शाङ्र्गरव–शारद्वताभ्यां सह हस्तिनापुरं प्रेषिता कुलपतिना कण्वेन।

रामायणे रामेण सह लक्ष्मणः हठं कृत्वा गच्छति। 'धनुरादाय सगुणं खनित्रपिटकाधरः। अग्रतस्ते गमिष्यामि पन्थान् तव दर्शयन्।।' आहरिष्यामि ते नित्यं मूलानि च फलानि च। वन्यानि च तथान्यानि स्वाहाराणि तपस्वीनाम्।। भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते। अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते।। (अयोध्याकाण्ड 31/24-27)

छायावदनुगमनं पत्न्याः साप्तपदीना प्रतिज्ञा। सीता वनगमनं रामेण सह करोति एवं कृतकृत्या हि वैदेही छायेवानुगता पतिम्। न जहाति रता धर्मे मेरुमर्कप्रभा यथा।। (अयोध्याकाण्ड 40-24)

यात्रासंस्कृतिः निर्धारयति अनुगमनस्य सीमानम्। शाकुन्तलम् स्वरयति–ओदकान्तं स्निग्धोऽनुगम्यते इति श्रूयते। मेघदूते मेघस्यानुगमनं मयूरः करोति। शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत्। रामायणे सर्वे पुरवासिनः रामस्यानुगमनं कुर्वन्ति। "मुखं द्रक्ष्याम रामस्य दुर्दशो मे भविष्यतीति संचिन्त्य" ततः सबालवृद्धा सा पुरी परमपीडिता। राममेवाभिदुद्रव घर्मातः सलिलं यथा। निर्गच्छति महाबाहौ रामे पौरजनाश्रुभिः। पतितैरभ्यवहितं प्रणनाश महीरजः। नरास्तमनुगच्छन्तः प्रियमिक्ष्वाकुनन्दनम्। रामायणे अयोध्याकाण्डे चत्वारिंशः सर्गाः पौरजनानुगमनाय समर्पिताः।

कुतः यात्रा कर्तव्या इत्यपि स्थिरीकरोति यात्रा–शास्त्रम्। देवस्थानात्, गुरुगृहात्, पितृगृहात्, मुख्यकलत्रगृहात्, मित्रसन्निधात् यात्रायाः आरम्भः आदिश्यते। कृष्णः देवगृहात् यात्रायाः समारम्भः करोति। रामः पितृगृहात् प्रचलितः। मेघः मित्रमालिङ्ग्य अलकायाः प्रयाणं चकार। बाणभट्टस्य यात्रायाः शुभारम्भः कुलदेवतागृहादेव वर्णितः। स्वरज्ञः स्वकीयं प्रवहमानं स्वरमेवाधारीकृत्य मनसा देवं गुरुं लक्ष्यं च संस्मृत्य स्वराश्रितं पादोत्थानं करोति। श्रूयते क्रूरेण रक्षसा परिवृत्तः अधिगतसर्वज्योतिषरहस्यः लंकायामवस्थितः गुप्तेन पलायितुं कामः भोजनसमये एव स्वदेशं ध्यानविषयीकृत्य चरणविक्षेपं चकार वराहमिहिरः।

यात्रासमये दानप्रदानस्य सन्दर्भः समुल्लसति। वनगमनकाले रामः उपस्थिताय



ब्रह्मचारिणे ब्राह्मणाय उपजीविने धनद इव मुक्तहस्तेन धनं ददाति। द्वाविंशः रामायणीयः सर्गः दानप्रकारेण परिवृत्तोऽस्ति द्वित्राणि उदाहरणानि–नित्यस्वाध्यायशीलत्वान्नन्यत्कुर्वन्ति किंचन। अलसास्वादुकामाश्च महतां चापि संमता इति सम्मन्त्र्य तेषां कृते अन्नपूर्णानि अशीतियानानि दानायादिदेश। जातरूपमयैर्मुख्यैरङ्गदैर्कुण्डलैः शुभैः। सहेमसूत्रैर्मणिभिः केयूरैर्वलयैरपि। अनन्यैश्च रत्नैःर्बहुभिः काकुत्स्थः आगतं वेदविदं सुयज्ञं पूजयति। उपस्थितान् आचार्यान् यानं दासीं कौशेयवस्त्राणि आसंतुष्टि ददाति। बाणोऽपि 'दत्त्वा द्युम्नं (धनं) यथा विद्यमानेभ्यः द्विजेभ्यः' यात्रां करोति।

वेदे परिकल्पिता, ब्राह्मणे परिवर्धिता ज्योतिषेऽन्वेषिताधारीकृताश्च, रामायणे संकलिता, पुराणे पल्लविता, स्वरशास्त्रे आध्यात्मीकृता, कविभिः काव्यविषयाकृता, ऋषिभिः दृष्टा, महर्षिभिः मन्थिता सिद्धैः चर्चिताः स्मृतिकारैरूपदिष्टा, पण्डितैः जल्पिता, महाभारते महतीकृता, आरण्यकैः परिष्कृता, विज्ञैः सूक्ष्मेक्षिकया सृष्टा, आचार्यैः उपदिष्टा, वैयाकरणैः व्युत्पादिता, लोके वन्दिता, विद्वद्भिः अनुष्ठिताः, विश्वविश्रुता छन्दोबद्धा, साहित्ये कलरवीकृता, व्यवहारज्ञानरूपशास्त्रप्रयोजनसाधिका, इतिहासप्रदर्शिका, कौतूहलपूर्णा आस्माकी यात्रा–संस्कृतिः विश्वसाहित्ये गुणगणेन प्रकाशतेतराम्।

❖

## सन्दर्भाः


1. रामायणम् सुन्दराकाण्डम् 1/8
2. हर्षचरिते द्वितीयः उच्छवासः, पृ.94
3. रघुवंशे प्रथमसर्गः 65-69
4. अभिज्ञानशाकुन्तलम्, अंक–4, पृ.372
5. तत्रैव, श्लोक–8
6. शब्दकल्पद्रुमे, भाग–5, पृ.2
7. ब्रह्मवैवर्तपुराणम् गणपतिखण्डः, अध्याय–33
8. गीता 16/24
9. विश्वविद्यालयपंचांगम्, दरभंगा, मुखपृष्ठतः उद्धृतः
10. तत्रैव, पृ.36

11. रामायणम्, युद्धकाण्डम्, 4/3-6
12. ब्रह्मवैवर्तपुराणम्, श्रीकृष्णखण्डः, अध्यायः-7
13. हर्षचरितम्, द्वितीयोच्छवासः,पृ.97
14. समयप्रदीपम्, शब्दकल्पद्रुमे, भाग-4 पृ.33
15. ब्रह्मवैवर्तपुराणम्, शाकुन्तलम् चतुर्थांके किशोरकेलि टीका, पृ.320
16. हर्षचरितम्, द्वितीय उ. पृ.97
17. ब्रह्मवैवर्त-श्रीकृष्णजन्मखण्डः, अध्यायः-71
18. वसन्तराजशाकुनम्, श.क.द्रु.भाग-5 पृ.2तः
19. श.क.द्रु. पृ.34
20. श्रीमद्वाल्मीकिरामायणम् 64/34,40
21. श.क.द्रु. भाग-4, पृ.34तः
22. मेघदूतम् (पूर्वमेघः)
23. हारीते द्वितीये स्थाने सप्तमेऽध्याये
24. हर्षचरितम्, द्वितीय उ., पृ.96
25. वसन्तराजशाकुनम् (5/2)
26. प्रतिमानाटकम् 1/6
27. वाल्मीकिरामायणम् 25 सर्गः
28. अभि.शाकुन्तलम् 4/10,9,12
29. वा.रा. बालकाण्डम् 22/2-3
30. वा.रा., अयो. का.25/40
31. तत्रैव, सर्ग 39/19/31
32. तथा 40/4/32
33. तथा सर्ग 34/22
34. तथा 24/20/33
35. तथा, 40/34
36. ब्रह्मवैवर्तपुराणम्, श्रीकृष्णजन्मखण्ड अध्यायः 71तः
37. स्वप्नवासवदत्तम्-प्र. अं.-ब्रह्मचारी प्र. प्रकरणम्
38. अभि. शा., 4/22
39. पूर्वमेघः श्लोकः 12
40. वा.रा.युद्धकाण्डम् 64/32-33
41. तथा, बालकाण्डम् 22/4-5
42. तथा, युद्धकाण्डम्, सर्ग 23
43. तथा, 64/36, 48, 49, 50
44. अभि.शा., कि.के.टीका, अंक-4 पृ.345तः
45. वसन्तराजशाकुनम्,श.क.द्रु.भाग-5 पृ.2तः
46. पूर्वमेघः श्लोकः-11
47.वा.रा.,किष्किन्धाकाण्डम्38/29-31
48. शिवस्वरोदयः 87
49. तथा, 98
50. तथा, 88
51. तथा, 61
52.पंचतंत्रम् अपरीक्षितकारकम्,कथा-14


❖



# दयानन्दसम्मता स्त्रीशिक्षा

**डॉ. सोमनाथ साहुः**

समाजस्य विकासे न केवलं पुरुषाणां प्रत्युत स्त्रीणामपि योगदानमत्यन्तं महत्त्वपूर्णं वर्तते। अतः पुरुषाणामिव स्त्रीणामपि शिक्षाव्यवस्था वर्तते। सुशिक्षितैव स्त्री सद्गृहिणी सती साध्वी सत्कर्मपरायणा वंशप्रतिष्ठास्वरूपा च भवितुमर्हति। स्त्रियः एव मातृभूताः सद्वंशं सद्राष्ट्रं च निर्मातुं प्रभवन्ति। अतः मातृशक्तेः शास्त्रेषु महद् गौरवमनुश्रूयते। यस्मिन् देशे समाजे च स्त्रीणामादरो भवति, स देशः समाजश्चोन्नतिं प्राप्नुतः। उक्तं च मनुना-

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**[1]

**सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते।**[2]

यदि नार्यः शिक्षिताः सन्ति, तर्हि ताः स्वपुत्राणां पालनं रक्षणं शिक्षणादिकं च सम्यक्तया करिष्यन्ति एवं च तासां सन्ततिः विद्यायुक्ता हृष्टा पुष्टा सद्गुणोपेताश्च भविष्यन्ति। अतएव महानिर्वाणतन्त्रेऽप्युक्तमस्ति-

**कन्याऽप्येवं लालनीया, शिक्षणीया प्रयत्नतः।**

स्वामिदयानन्दस्य सत्यार्थप्रकाशे प्रश्नोत्तरशैल्या स्त्रीशिक्षाविषये विशदरूपेण विचारः प्रवर्तितः। तद्यथा-

प्रश्नः-अपि योषितः शूद्राश्चापि वेदमधीयीरन्, एतेष्वधीयमानेषु वयं किं करिष्यामः? नाप्येषामध्ययने प्रमाणमुपलभ्यते प्रत्युतायं निषेधः सन्दृश्यते-'**स्त्रीशूद्रौ नाधीयातामिति श्रुतेः**' इति।

उत्तरम्-सर्वे पुमांसो योषितश्च (मनुष्यमात्रमिति यावत्) अध्ययनेऽधिक्रियन्ते। वेदेषु कन्यानामध्ययनप्रमाणं पश्यत-'ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्' इति।

अथर्व. का. 11 प्र.24 अ.3 पृ.8

यथा वै बाला ब्रह्मचर्येण पूर्णविद्यां सुशिक्षां च सम्प्राप्य युवतिं विदुषीं स्वानुकूलां प्रियां स्वसदृशीं च भार्यां परिणयन्ते तथैव कुमार्यो ब्रह्मचर्यसेवनेन वेदादिशास्त्राण्यधीत्य सकलविद्यां शिक्षाञ्चोत्तमां सम्प्राप्य प्राप्तयौवनं स्वसमानं प्रियं पुमांसं लभेरन्[3] इति।

तथा च न केवलं बालकानामेव उपनयनसंस्कार आसीत्, प्रत्युत बालिकानामपि उपनयनसंस्कारोऽभूदिति विविधप्राप्तप्रमाणैः संसाधयति इदं तथ्यम्। इदमासीत् सामान्याऽवधारणा यत् यस्योपनयनसंस्कारो न जातः सः वैदिकसन्ध्याप्रार्थनायज्ञादिकार्येषु वेदमन्त्राणामुच्चारणं कर्तुमर्हो न भवति। तस्माद् बालिकानामपि उपनयनसंस्कारः स्वाभाविक एव आसीदिति प्रतिभाति। विषयेऽस्मिन् प्रमाणमुपन्यस्तुं कानिचिदार्षवचनानि प्रस्तूयन्ते। तथाहि–

**पुराकाले तु नारीणां मौञ्जीबन्धनमिष्यते।**
**अध्यापनञ्च वेदानां सावित्रीवचनं तथा।।**

अपि च,

**पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः।**
**स्वगृहे चैव कन्यायाः भैक्ष्यचर्या विधीयते।।** इति।

एवञ्च द्विजाः स्वगृहेषु निर्धारितसमये बालानुपनीय विहितोचितसंस्काराः कुमारीश्च तत्तत्पाठशालासु प्रेषयेयुः। इत्थमेव कृतोपनयनो द्विजब्रह्मचारी कुमारः, कुमारी च ब्रह्मचारिणी वेदार्थज्ञानरूपोत्तमं तपः शनैः प्रवर्धयेताम्।

सत्यार्थप्रकाशे स्त्रीणां ब्रह्मचर्यव्रतविषये सम्यक् प्रतिपादितम्। यथा–

प्रश्नः–किमयं नरनारीभ्यां कृते समानो ब्रह्मचर्यनियमः?

उत्तरम्–नहि, यदि हि नाम पुमान् पञ्चविंशतिः (25), त्रिंशत् (30), षट्त्रिंशत् (36), चत्वारिंशत् (40), चतुःचत्वारिंशत् (44), अष्टचत्वारिंशत् (48) वर्षाणि यावत् ब्रह्मचर्यमाचरेत् तर्हि कन्यानुक्रमेण षोडश (16), सप्तदश (17), अष्टादश (18), विंशतिः (20), द्वाविंशतिः (22), चतुर्विंशतिः (24), वर्षाणि ब्रह्मचर्यं परिपालयेत्। अष्टचत्वारिंशद्वर्षसमनन्तरं पुरुषेण चतुर्विंशतिवर्षेभ्यश्च परं कन्यया ब्रह्मचर्य्यपालनमनावश्यकम्। गृहस्थधर्मं परिपालयितुकामैरेव पुरुषैरयं नियमो अनुष्ठेयः तदितरे च यावज्जीवं समाचरन्तु नाम ब्रह्मचर्य्यम्।[4] विचारप्रसङ्गे



एवं हि विज्ञायते यत् महर्षीणामौदार्येणैव महिलाजनः पुनः शिक्षिताः बभूवुः। उक्तं हि–

**स मन्महिम्ना महिलाजनः पुनः स्ववेदवेदाध्ययनाधिकारवान्।**
**सुमन्त्रशिक्षामुपनीतदीक्षया प्रपद्य भेजे निजगौरवश्रियम्।।[5]**

दयानन्दमहर्षेरनुसारं स्त्रीणां पाठशाला पृथग्रूपेण भवेत्। विद्यामन्दिरञ्च निर्जनप्रदेशेषु करणीयम्। अर्थात् ग्रामात् नगराद्वैकस्मिन् योजने भवेत्। किञ्च कुमारकुमारीणां पाठशालेऽन्योन्यतो गव्यूत्यन्तराले भवेताम्। तत्रत्या अध्यापका अध्यापिका भृत्यवर्गाश्च सर्व एव कार्यकर्त्तारौ बालानां शालासु पुरुषाः कुमारीणाञ्च शालासु नार्यो भवेयुः। कन्यानां विद्यामन्दिरेषु पञ्चवर्षीयेणापि बालकेन, कुमारीणां च पाठशालासु पञ्चवर्षीययापि कन्यया न प्रवेष्टव्यम्। यावद्धि ते ब्रह्मचर्यमाचरेयुः तावदन्योऽन्यस्य दर्शनं, स्पर्शनं, रहस्यावस्थानं, मिथः सम्भाषणं, विषयालापः, परस्परक्रीडा, विषयध्यानं सङ्गश्चेत्यष्टविधमैथुनं परिहरेयुः गुरवश्च ततो बालान् पृथक् स्थापयेयुः। येन ते विद्ययोत्तमशिक्षया सौशील्यसत्स्वभाबादिभिर्गुणैः शरीरात्मनोर्बलेन समन्विता नित्यं शोभमानाः प्रमोदभरमाप्नुयुः।

प्रश्नः–नार्योऽपि किं वेदानधीयीरन्?[6]

उत्तरम्–अवश्यम्, पश्यत श्रौतसूत्रादिषु–

**'इमं मन्त्रं पत्नी पठेत्।'**

यज्ञे मन्त्रमिमं भार्या सम्पठेदिति। अनधीतवेदादिशास्त्रा हि योषा यज्ञेषु कथं सत्वरं मन्त्रानुच्चारयितुं संस्कृतवाचि भाषितुं च पारयेत्। पुराप्यस्मिन् भारते योषितामलङ्कारस्वरूपा गार्गीप्रभृतयो वेदादिशास्त्राण्यधीत्य पूर्णविदुष्योऽभवन्निति शतपथब्राह्मणे स्पष्टं विलिखितम्। एवञ्च ब्रह्मवादिन्यः स्त्रियः स्ववैदुष्येण सर्वासु दिक्षु ख्यातिं प्रापुः। ताः वैदिकसाहित्यस्य साङ्गोपाङ्गञ्चाध्ययनं विधाय स्त्रीभ्यो विशिष्यमुदाहरणं प्रस्तुतवत्यः। एतैरुदाहरणैः स्त्रियः गौरवान्विता अभूवन्। एतासु स्त्रीषु विश्ववारा, सिकता, लोपामुद्रा, घोषा, अपाला, रोमशा, उर्वशी प्रभृतीनां स्त्रीणां नामानि इतिहासेऽति प्रसिद्धानि जायन्ते। इदमप्यत्र वेदनीयं यद् ऋग्वेदस्य अन्यस्य च वेदस्यानेकासां सूक्तीनाम् 'ऋषिका' नारी बभूव। तथाहि–मीमांसासदृशे नीरसे कठिने च शास्त्रेऽपि विदुष्यः स्वरुचिं प्रदर्शितवत्यः। एतस्मिन् सन्दर्भे 'आपिशला',

'काशकृत्स्ना' इत्यनयोर्नाम वयं स्मरामः। तद्यथा-'आपिशलमधीते ब्राह्मणी आपिशला ब्राह्मणी, काशकृत्स्नमधीते काशकृत्स्ना ब्राह्मणी' इति। भगवान् पतञ्जलिरपि आचार्या, उपाध्यायी इत्यनयोरुल्लेखमकरोत्। तथाहि 'उपेत्याधीयते तस्या उपाध्यायी-उपाध्याया।'[7]

इदमपि ज्ञातव्यमस्ति यत् कालान्तरे यदा दर्शनशास्त्रस्याध्यापनं प्रचारितमभवत्तदा स्त्रियोऽपि दर्शनशास्त्रे विद्यमानं निगूढतत्त्वं ज्ञातुं दर्शनशास्त्रम्प्रति स्वरुचिं प्रदर्शितवत्यः। अस्मिन् सन्दर्भे महर्षे याज्ञवल्क्यस्योदाहरणं शास्त्रेषु प्रख्यातमस्ति। महर्षेः याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः। मैत्रेयी कात्यायनी च। अनयोरुभयोरपि 'मैत्रेयी' ब्रह्मवादिनी बभूव। सा आध्यात्मपरायणाऽऽसीत्, परन्तु कात्यायनी सांसारिकसुखमधिगन्तुमेव सर्वदा तत्परा बभूव। याज्ञवल्क्यः स्वधनं तयोर्मध्ये विभज्य स्वयं संन्यासाश्रमं प्रति जिगमिषति। धनविभाजनप्रयुक्तं प्रस्तावं श्रुत्वा मैत्रेयी याज्ञवल्क्यं पप्रच्छ-'यदि धनधान्यपरिपूर्णा समस्ता पृथ्वी प्राप्यते, किं तेनाहममृतत्वं प्राप्तुं क्षमा स्याम्।' नहि, नहि एतेन केवलं सांसारिकमेव सुखमधिगन्तुं शक्यते, न तु अमृतत्त्वम्' सा होवाच मैत्रेयी। येनाहं नामृतस्याम्, किमिहि तेन कुर्यामिति।

इत्थं याज्ञवल्क्यमैत्रेयीसंवादं पठित्वा स्फुटं विज्ञायते यत् न केवलं तस्याः दर्शनशास्त्रम्प्रत्यभिरुचिरेवासीत् प्रत्युत सा दर्शनशास्त्रस्य विदुषी बभूव। अपि च-राज्ञः जनकस्य सभायां याज्ञवल्क्येन सह शास्त्रार्थं कुर्वती गार्गी स्वीयामाध्यात्मिकप्रतिभां प्रदर्श्य सूक्ष्मातिसूक्ष्मं दार्शनिकं प्रश्नं[8] याज्ञवल्क्यं पप्रच्छ, अनतिप्रश्ना वै देवतामतिपृच्छति। तस्याः आध्यात्मिकशास्त्रसम्बद्धः प्रश्नः एतादृशः सूक्ष्मो बभूव यस्योत्तरं याज्ञवल्क्यः सार्वजनिके स्थाने प्रदातुं समर्थो नाभवत्। एतेन सुस्पष्टं भवति यद् 'गार्गी' न्यायशास्त्रस्य षड्दर्शनानाञ्च विश्रुता विदुषी आसीदिति।

आत्रेयी अपि एतादृशी विदुषी आसीत्, या वेदान्तशास्त्रस्य शिक्षां वाल्मीकेराश्रमात्, अगस्त्य-सकाशात् प्राप्तवती। तथाहि-'तेभ्योऽधिगन्तुं निगमान्तविद्यां वाल्मीकिपार्श्वादिह संचरामि।'[9] दयानन्दस्वामिनो वर्णनमिदमत्र प्रभवति-

**स्वराज्यसञ्चालनकर्मशिक्षिता नरेन्द्रकन्या रणयज्ञदीक्षिताः।**

**अनेकविद्यासुकलाभिमण्डिता अमण्डयन्नार्यमहीं महीयसीम्।।**[10]

रामायणस्याध्ययनेन विज्ञायते यद्रामस्याभिषेकदिने प्रातकालादेव कौसल्या



यज्ञमकरोत्। बालिः यदा युद्धाय प्रस्थितवान् तदा तस्याः पत्नी तारापि यज्ञकार्यं सम्पादितवती। एतयोरुभयोरपि कृते 'मन्त्रवित्' शब्दस्य प्रयोगो दृश्यते। तद्यथा-

**सा क्षौमवसना हृष्टा नित्यं व्रतपरायणा।**

**अग्निं जुहोति स्म तदा मन्त्रविष्कृतमङ्गला।।**[11]

अपि च-**ततः स्वस्त्ययनं कृत्वा मन्त्रविद्विजयैषिणी।**[12]

यजुर्वेदभाष्ये दयानन्देन स्त्रियो युद्धेऽपि पतिभिः सह तिष्ठेयु[13]रित्युक्तम्। सभापत्यादिभिर्यथाऽतिप्रशंसिता दृष्टपुष्टा साङ्गोपाङ्गा पुरुषसेना स्वीकार्या तथा स्त्रीसेना च।[14] एवमेव यथा युद्धविद्यया पुरुषाः शिक्षणीयास्तथा स्त्रियश्च यथा वीरपुरुषा युद्धं कुर्युस्तथा स्त्रियोऽपि कुर्वन्तु।[15] यथा राजा राजपुरुषाश्च यानाश्वचालनयुद्धव्यवहारान् जानीयुः तथा तत्स्त्रियोऽपि विजानन्तु।[16] एवञ्च यथा पुरुषः सर्वदिक्षुकीर्तिर्वेदप्रवीणः सत्यकारी सर्वस्य सुखप्रदो धार्मिको जनो भवेत्तथा हे राजन्! तव पत्नी स्यात्ते राजधर्मे स्वीकृत्यास्माद् बहुमुखं बहुश्रियं च प्राप्नुवन्तु[17] इति।

पश्यत-आर्यावर्तीयराजपुरुषाणां योषितोऽपि धनुर्वेदं-युद्धविद्यां सम्यग्विदन्ति स्म अन्यथा कथं कैकेयीप्रभृतयो दशरथप्रमुखैः सह समराङ्गणमवतीर्य योद्धुमशक्नुवन्। तस्माद् ब्राह्मणीक्षत्रियाभ्यां सकलविद्यां वैश्यया व्यवहारविद्या, शूद्रया च पाकशुश्रूषादिविद्या अवश्यमध्येतव्याः। पुरुषैः न्यूनातिन्यूनं व्याकरण-धर्म-स्वव्यवहारविद्या अवश्यं शिक्षणीयाः। योषिद्भिरपि व्याकरण-धर्म-वैद्यक-गणित-शिल्पविद्या अवश्यमेवाधि-गन्तव्याः। नह्येषां शिक्षणमन्तरेण सत्यासत्यविनिर्णयः, भर्त्रादिभिरनुकूलव्यवहारः, यथायोग्यं सन्तानोत्पत्तिः, तेषां पालनवर्द्धने सम्यक् शिक्षाप्रदानम्, सकलगृहकार्याणां यथायथमनुष्ठानञ्च सम्भवति। तथा च आयुर्वेदविज्ञानं विनान्तपानादिकमौषधवत्साधयितुं न प्रभवन्ति येन हि सद्मनि व्याधयो न कर्हिचिदपि संक्रामेयुः सर्वे च नित्यं सानन्दं निवसेयुः।

शिल्पविद्याविज्ञानमन्तरेण गृहविरचनम्, वसनभूषणादीनां निर्माणं निर्मापणञ्च, गणितविद्यां विना सर्वेषामायव्ययबोधः प्रबोधनं च न सम्भवति। वेदादिशास्त्रविज्ञानमन्तरेण परमेश्वर धर्माविज्ञायाधर्मान्न कर्हिचिन्निवर्त्तेरन्।[18] तस्मात्त एव धन्यवादार्हाः कृतकृत्याश्च ये वै ब्रह्मचर्येण उत्तमशिक्षया विद्यया च स्वसन्ततीनां शरीरात्मनोः पूर्णं बलं

प्रवर्धयेयुः। येन हि तान्यपत्यानि मातृ-पितृ-भर्तृश्वशुरराजप्रजाप्रतिवेशि-इष्ट-मित्र-सन्तानादिभिर्यथा-यथं धर्मेण वर्तेरन्।

यजुर्वेदभाष्ये दयानन्दः स्त्रीन्यायं स्त्री, पुरुषन्यायं पुरुषश्च कुर्य्यात्[19] इति प्रतिपादितवान्। ऋग्वेदभाष्येऽपि तथा राजानः पुरुषाणां कुर्युस्तथैव स्त्रीणां न्यायं राज्ञ्यः कुर्य्युरि[20]त्युक्तम्। अनेनेदं स्पष्टं यद् तदा स्त्रियः न्यायकारिण्योऽभूवन्निति. राजपत्नी सर्वासां स्त्रीणां न्यायसुशिक्षे च सदैव कुर्य्यात्। नैतासामेते पुरुषैः कारयितव्ये। कुतः पुरुषाणां समीपे स्त्रियो लज्जिता भीताश्च भूत्वा यथावद्वक्तुमध्येतुं च न शक्नुवन्त्यतः।[21] राज्ञी राजानं प्रति ब्रूयात् अहं भवतो न्यूना नास्मि, यथा भवान् पुरुषाणां न्यायाधीशोऽस्ति तथाऽहं स्त्रीणां न्यायकारिणी भवामि, यथा पूर्वा राजपत्न्यः प्रजास्थानां स्त्रीणां न्यायकारिण्योऽभूवन् तथा अहमपि स्याम्।[22] स्वामिचरणाः उक्तवन्तः यत्-हे स्त्रियः! यथा युष्माकं पतयो न्यायाधीशा भूत्वा सापराधानपराधिनां सत्यन्यायेन विवेचनं कृत्वा सापराधान् दण्डयन्ति निरपराधिनः सत्कुर्वन्ति युष्माननुत्तमानानन्दान् प्रददति तथा यूयमपि भवत इति। एवञ्चान्ततो गत्वा इदं ह्युक्तम्-यः राजपुरुषः पुरुषाणां न्यायाधिकारे तिष्ठेत्तस्य स्त्री स्त्रीणां न्यायासने स्थिता भवेत्। अतः किमागतं यादृशो नीतिविद्याधर्मयुक्तः स्वामी पुरुषाणां न्यायं कुर्यात्तादृश्येव तत्स्त्रिया भवितव्यमिति।[23]

स्त्रीणां वैद्यकशास्त्रेऽपि प्राविण्यमपेक्षते इति स्वामिचरणानामाशयः। अत एवोक्तम्-मातापितृभ्यां कन्याभ्यो व्याकरणादिकमध्याप्य वैद्यकशास्त्रमप्यध्यापनीयम्। यत इमा आरोग्यकारिका गर्भसंपादिनीरोषधीर्विज्ञाय सुसन्तानान्युत्पाद्य सततं प्रमोदेरन्।[24] एवञ्च स्त्रीभिरवश्यमेव औषधिविद्या ग्राह्या नैतामन्तरा पूर्णं कामसुखं लब्धुं शक्यम्। रोगान्निवर्त्तयितुं च। पुनरप्युक्तम्-यथा वैद्यकशास्त्रविदः पतयः शरीरारोग्यादिकं विधाय स्त्रियः सततं सुखयेयुस्तथैव विदुष्यः स्त्रियः स्वपतीन् रोगरहितान् कुर्युरिति।[25]

एतेषामाशय आसीत् याः स्त्रियो गृहाश्रमविद्याक्रियाकौशलयोर्विदुष्यः स्युस्ता एव सर्वेभ्यः सुखानि दातुमर्हन्ति इति। अतः सुदक्षया स्त्रिया गृहकृत्यसाधनानि पूर्णानि कृत्वा कार्य्याणि साधनीयानि।[26] एवञ्च मनुष्यैः सर्वर्त्तुसुखप्रदानि गृहाणि रचयित्वा तत्र सर्वान् योग्यान् पदार्थान् संस्थाप्यैतत्सर्वं कृत्वा प्रतिदिनं सुखयितव्यमिति।[27]

नैतावत् अपितु स्त्रियः राजनीतिविद्यामप्यधिगतवत्यः। उक्तं हि-यादृशीं राज-



नीतिविद्यां राजाऽधीतवान् भवेत् तादृशीमेव राज्ञ्यप्यधीतवती स्यात्। सदैवोभौ पतिव्रतास्त्रीव्रतौ भूत्वा न्यायेन पालनं कुर्याताम्[28] इति। एवञ्च यथा राज्ञां समीपे पुरुषा अमात्या भवन्ति तथा राज्ञीनां निकटे स्त्रियो भवन्तु[29] इति।

यदि नाम पुरुषो विचक्षणो भार्या चाविचक्षणा, अथवा भार्या विदुषी पुरुषाश्चा-विद्वान् भवेत् तर्हि प्रत्यहं दैवासुरसंग्रामः प्रवर्तत कुतः पुनः सुखम्? अनधिगतविद्या हि नार्यः कन्यानां पाठशालायां कथमध्यापिकापदवीं लभेरन्। एवमेव विद्यां विना न्यायाधीशत्वादिराजकार्यं गृहाश्रमकार्यम्-भर्त्रा भार्यायाः, भार्यया च भर्तुः प्रसादनम्, निखिलगृहकार्याणां च भार्याधीनत्वम्, (भार्याधीनानि सकलगृहकर्माणि च) न कर्हिचित्सम्यक् भवितुमर्हन्ति।[30] एवञ्च देशस्य समाजस्य चोन्नत्यै श्रीवृद्ध्ये च स्त्रीशिक्षाऽत्यावश्यकी वर्तते इति।

❖

## सन्दर्भाः

1. मनुस्मृतिः- 3.56
2. मनुस्मृतिः- 2.145
3. सत्यार्थप्रकाशः, तृतीयसमुल्लासः, पृ.59
4. सत्यार्थप्रकाशः, तृतीयसमुल्लासः, पृ.34
5. दयानन्ददिग्विजयं महाकाव्यम् 1/47, पृ.35
6. सत्यार्थप्रकाशः, तृतीयसमुल्लासः, पृ.59
7. महाभाष्यम्-3/3/2 वा, 1 पृ.302 उ.प.का. भा.पृ.436
8. बृ. दा. उ. नि. 3/6/1
9. उत्तररामचरितम्, अङ्कः-2
10. दयानन्ददिग्विजयं महाकाव्यम् 1/22, पृ.20
11. रामायणम् 2.20

12. रामायणम् 4.16
13. यजुर्वेदभाष्यम् 14.3
14. यजुर्वेदभाष्यम् 17.44
15. यजुर्वेदभाष्यम् 17.45
16. यजुर्वेदभाष्यम् 21.50
17. यजुर्वेदभाष्य 10.28
18. स.प्र.तृ.स. पृ.69
19. यजुर्वेदभाष्यम् 13.16
20. ऋग्वेदभाष्यम् 5.46.7
21. यजुर्वेदभाष्यम् 10.26
22. ऋ. भ. 1.126.7
23. यजुर्वेदभाष्यम् 12.63, 13.17, 10.27
24. यजुर्वेदभाष्यम् 11.48
25. यजुर्वेदभाष्यम् 12.92, 19.82
26. यजुर्वेदभाष्यम् 14.4, 15.59
27. ऋग्वेदभाष्यम् 1.48.15
28. यजुर्वेदभाष्यम् 13.16
29. ऋग्वेदभाष्यम् 5.46.8
30. स.प्र.तृ.स. पृ.59

❖



# रघुवंशवर्णिते समाजे लौकिकी प्रथा

डॉ. मञ्जू कुमारी

विधातुः सर्वोत्तमकृतिः मानवः। मानवजीवनं पूर्णतया सामाजिकं भवति। यस्मिन् समाजे मानवः निवसति तस्य समाजस्य लोकजीवनात् प्रभावितं तस्य जीवनमपि भवति। लोकजीवनात् कस्यचिद् मनुष्यस्य श्रद्धाविश्वासरुच्यादीनाञ्च सम्बन्धोऽपि भवति। अतः लोकजीवनस्य विविधेभ्यः पक्षेभ्यः पृथग् वैयक्तिकं जीवनं कल्पयितुं नैव शक्यते। कस्माच्चिदपि लोकजीवनात् साहित्यं प्रभावितं भवति। अतएव साहित्यं समाजस्य दर्पणमित्यभिधीयते। दृष्टे हि तस्मिन् सामाजिकं जीवनं चित्रं वा अविकलं दृष्टं भवति। काव्येषु कृत्याकृत्यप्रवृत्तिनिवृत्तिरूपं लक्ष्यं साधयितुं लोकजीवनस्य विविधपक्षान् प्रस्तुवन् कवयोऽपि दरीदृश्यन्ते। वस्तुतः लोकजीवनस्य विविधाचारैः समन्वितं काव्यं सौकर्येण लोकग्राह्यं भवति। यतो हि लोकाचाराणां वर्णनेन काव्यं लोकजीवनस्य सामीप्यं प्राप्य सहृदयेषु सुरुचिमुत्पादयति।

महाकवेः कालिदासस्य रघुवंशमहाकाव्ये रघुवंशीयानां नायकानां जीवनचरितस्य वर्णनप्रसङ्गे लोकाचाराणां मान्यतानाञ्च चित्रणं यत्र-तत्र दृक्पथमायाति।

सामान्यतया समाजस्याधिसंख्यं जनैः चिरकालपर्यन्तं यस्याचारस्यानुसरणं क्रियते सैव 'प्रथा' इत्यनेन रूपेण अभिमन्यते। विषयेऽस्मिन् उक्तमपि समनर महोदयेन-

**"सुपरिभाषितः लोकाचारः एव प्रथा भवति।"[1]**

प्रथारूपेण प्रसिद्धे पूर्वं आचारविशेषः जनसमुदायेनाचर्यते। तदा सः व्यवहारविशेषः जनरीतिरित्युच्यते। पुनः यदा जनसमुदायेनानुभूयते यत् एषः व्यवहारविशेषः समूहस्य कृते किं वा समुदायस्य व्यवहृतिं नियन्त्रयितुम् अनिवार्यो वर्तते तदा सः व्यवहार 'प्रथा' रूपेण प्रचलितो भवति। मैकाइवर महोदयेन भणितम्-

"The socially accredited ways of acting are the customs of society.[2]

तर्कधिया विज्ञानदृष्ट्या च सिद्धा भवतु न वा किन्तु लौकिकी प्रथा व्यक्तिं परिवारं समाजञ्च सञ्चालयति। हिन्दुजीवनं समुन्नेतुं सुसंस्कृतञ्च कर्तुं महर्षिणा मनुना षोडश संस्काराः कल्पिताः।[3] लोकजीवने संस्कारैरेतैः सम्बद्धाः विविधाः प्रथाः जनैः बहुधा आचर्यन्ते। रघुवंशवर्णिते समाजेऽपि प्रथाः प्रचलिताः दृश्यन्ते-

**पुत्रजन्मोत्सवः**—काव्येऽस्मिन् पुत्रजन्म अपूर्वानन्दस्य अवसररूपेण वर्णितो विद्यते। उत्सवोऽयं महता वैभवेनाचर्यते स्म। अवसरेऽस्मिन् सर्वत्र माङ्गल्यं प्रसारयितुं श्रोत्रसुखदानां मङ्गलवाद्यानां समवेतध्वनिना वादनं भवति स्म। जनरञ्जनाय वराङ्गनानां नृत्यानि प्रस्तूयन्ते स्म। रघोः जन्मकाले राज्ञः दिलीपस्योत्साहस्याद्भुतं वर्णनं कविना प्रस्तुतं वर्तते। रघोर्जन्मवृत्तं श्रुत्वा दिलीपः प्रभूतं दानं दत्तवान्। यः कोऽप्यनुचरः वृत्तमिदं श्रावितवान् सः राज्ञा दानं लब्धवान्।[4] स्पष्टमनेन यत् पुत्रजन्मोत्सवे भृत्यादिषु उपायनदानस्य प्रथा प्रचलिता आसीत्।

**स्वयंवरप्रथा**—महाकाव्येऽस्मिन् विवाहसन्दर्भे स्वयंवरप्रथा अपि उल्लिखिता प्राप्यते। वस्तुतः स्वयं वरविधिः न तु विवाहविधिरूपेणात्र अपितु वरचयनपद्धतिरूपेणैव दृश्यते। स्वयं वरेषु दूरस्थेभ्यः देशेभ्योऽपि राजपुत्रानाहूय कन्यायाः अभिरुच्यनुसारेण किं वा राजपुत्राणां शौर्यं परीक्ष्य वरचयनं भवति स्म। अत्र स्वयंवरस्य रूपद्वयमवलोक्यते। राजकन्या स्वयंवरे समागतेषु राजपुत्रेषु कमप्येकं निजाभिरुच्या चित्वा वृणोति स्म। यथा-इन्दुमती स्वयंवरेऽजं वृणोति। ज्ञायतेऽनेन यत् तदानीं समाजे कन्याजीवने वरचयनार्थं पूर्णं स्वातन्त्र्यमासीत्। पुनश्चापरे स्वयंवरे समागतैः राजपुत्रैः कन्यापित्रा निर्धारितायां वीर्यपरीक्षायां पराक्रमः प्रदर्शनीयो भवति स्म, सीतास्वयंवरे यथा रामेण कृतम्। स्वयंवरे वरचयनान्तरं विवाहः आर्षविधिना ब्राह्मविवाहक्रियाभिरेव सम्पद्यते स्म।

**विवाहोत्सवः**—विवाहोत्सववर्णनेषु कवेः कालिदासस्य शास्त्रानुमोदितरीतिषु रुचिः दृश्यते। अतः तत्र लौकिकी प्रथा न्यूनत्वेन वर्णिता प्राप्यते। तथापि वरयात्रादीनां वर्णनं लोकजीवनस्य जनरीतेः स्वाभाविकं रूपं प्रस्तौति। स्वयंवरस्थलात् विवाहार्थं कुमारस्याजस्य विदर्भराजेैस्यान्तःपुरगमनवर्णनं वरयात्रायाः दृश्यमुपस्थापयति।



अस्मिन्नवसरे विशिष्टसज्जा लोकप्रथामेव स्मारयति-

**तात्प्रकीर्णाभिनवोपचारमिन्द्रायुधद्योतिततोरणाङ्कम्।**
**वरः स वध्वा सह राजमार्गं प्राप ध्वजच्छायनिवारितोष्णम्।।7.4**

विवाहकाले श्वशुरालये प्रथमागमनावसरे वरस्य स्वागतार्थाय रमणीयानां सिंहासनानां प्रयोगो भवति स्म। स्वागतकर्मणि वस्त्रार्घ्यादीनां दानं वराय दीयते स्म-

**महार्हसिंहासनसंस्थितोऽसौ सरत्नमर्घ्यं मधुपर्कमिश्रम्।**
**भोजोपनीतं च दुकूलयुग्मं जग्राह सार्धं वनिताकटाक्षैः।।7.18**

वरयात्रां द्रष्टुं बालैः सह नारीणामुत्साहेन लोकस्य प्रथायामस्यां गहनाभिरुचिः प्रदर्श्यते-

**ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु।**
**बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्टितानि।।7.5**

**पाणिग्रहणम्**—वरचयनान्तरं विवाहे पाणिग्रहणप्रथा आचर्यते स्म। पाणिग्रहणविधिना विवाहः लोकमान्यो भवति स्म। इन्दुमत्याः विवाहे भोजपतेः पुरोहितः पूताग्नौ आहूतिं समर्प्य वरवध्वोः पाणिग्रहणं सम्पादयति-

**तत्रार्चितो भोजपतेः पुरोधा हुत्वाग्निमाज्यादिभिरग्निकल्पः।**
**तमेव चाधाय विवाहसाक्ष्ये वधूवरौ सङ्गमयाञ्चकार।।7.20**

अग्नेः साक्ष्यमुपस्थाप्य कविना पाणिग्रहणप्रथायाम् अग्नेः महत्त्वं द्योत्यतेऽत्र। प्रथैषा अद्यापि समाजे दृश्यते।

पाणिग्रहणस्य पश्चात् वरवध्वोः प्रदक्षिणाप्रथाऽपि दृष्टिपथमायाति-

**प्रदक्षिणप्रक्रमणाकृशानोरुदर्चिषस्तन्मिथुनं चकासे।**
**मेरोरुपान्तेष्विव वर्तमानमन्योन्यसंसक्तमहस्त्रियामम्।।7.24**

**अक्षतदानम्**—प्रदक्षिणानन्तरं वधूवरौ उत्तमासने उपविष्टौ भवतः स्म। तदा स्नातकैः बान्धवैः पुरन्ध्रिभिश्चाक्षतदानेनाशीर्वादैश्च विभूषितौ भवतः स्म-

**तौ स्नातकैर्बन्धुमता च राज्ञा पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम्।**
**कन्याकुमारौ कनकासनस्थावार्द्राक्षतारोपणमन्वभूताम्।।7.28**

**यौतुकप्रथा**—कन्याविवाहे पितृपक्षदत्तोपायनेन यौतुकप्रथाप्रचलनं द्योत्यते। राज्ञा भोजने बहूनि वस्तूनि यौतुकरूपेण भगिन्यै इन्दुमत्यै दत्तानि-

**"सत्त्वानुरूपाहरणीकृतश्रीः।"**[5]

इत्यनेन ज्ञायते यद् सामर्थ्यानुसारेणैव यौतुकं दीयते स्म।

संस्कारैः सह अन्याः प्रथाः अपि समाजे प्रचलिता आसन्। मनोरञ्जनाय ऋतुपरिवर्तनकाले उत्सवाः आयोज्यन्ते स्म।

**वसन्तोत्सवः**—वसन्तर्तोरागमने सति राज्ञा दशरथेनायोजितेन वसन्तोत्सवेन ज्ञायते यदुत्सवोऽयं राज्ञां विलासलीलामुन्मुक्तं स्वरूपमासीत्। ऋतोरस्य कामोद्दीप्त-भावानां तृप्त्यर्थं बहूनि दिनानि पर्यन्तमुत्सवं समायोज्यते स्म। उत्सवेऽस्मिन् स्त्रियः पतिभिः सह दोलायमानाः स्म।[6]

**यज्ञोत्सवः**—देवानां तुष्टये रघुवंशे यज्ञक्रियाः सम्पादिताः दृश्यन्ते। यज्ञकाले यज्ञाश्वमुक्तेः राजभिरुपायनदानं, नगरस्य मण्डनं शास्त्रोक्तरीत्या यज्ञक्रियाणां सम्पादनं च पञ्चदशसर्गे विस्तरेणोपलभ्यते। एतादृशेष्ववसरेषु यज्ञक्रियां सम्पादयितुं धर्मपत्न्याः उपस्थितिरपि लभ्यते।

यज्ञादिषु स्त्रीणामुपस्थितिरनिवार्या इति रामेण कृताश्वमेधयज्ञे सीतायाः स्वर्णमूर्तेः स्थापनेन स्पष्टम्।

**मानवेतरशक्तिषु विश्वासः**—रघुवंशस्य कथानके विविधेषु स्थानेषु मानवेतरशक्तिषु विश्वासप्रथा दरीदृश्यते। कल्पवृक्षः कामधेनुः नन्दिनी च मानवेतरशक्तेः प्रतीकरूपेण प्रतीयन्ते। प्रथमे सर्गे महर्षिवशिष्ठमुखेन नन्दिन्याः शक्तेर्वर्णनं किं वा राज्ञा अजेनाहतस्य वन्यगजप्रियंवदस्य गन्धर्वरूपेण प्रस्तुतिः मानवेतरशक्तेः समाजे स्वीकृतिमेव प्रमाणयति-

**स विद्धमात्रः किल नागरूपमुत्सृज्य तद्विस्मितसैन्यदृष्टः।**

**स्फुरत्प्रभामण्डलमध्यवर्ति कान्तं वपुर्व्योमचरं प्रपेदे।।5.51**

सीतायाः भूतलगमनप्रसङ्गे दिव्यसिंहासनस्थायाः पृथिवीदेव्याः प्राकट्येनापि प्रथेयं पुष्टिमाप्नोति।[7]

**शकुनानि**—रघुवंशवर्णिते लोकजीवने प्रचलितान्येतानि शुभान्यशुभानि वा शकुनानि कार्ये साफल्यं वैफल्यञ्च संसूचयन्ति। इन्दुमत्याः प्राप्तिविषये शङ्कितस्याजस्य



वामेतरो बाहुर्भूयोभूयः स्पन्दितो भूत्वा विजयं सङ्केतयति-

**तस्यां रघोः सूनुरुपस्थितायां वृणीत मां नेति समाकुलोऽभूत्।**

**वामेतरः संशयमस्य बाहुः केयूरबन्धोच्छ्वसितैर्नुनोद।।6.68**

पुत्रकामनया राज्ञः दिलीपस्य वशिष्ठाश्रमं प्रति गमनावसरे[8] पुनश्च दिग्विजयार्थं रघोः प्रस्थानावसरेऽपि विविधानि मङ्गलशकुनानि[9] भाविनं साफल्यं सूचयन्ति।

**अपशकुनानि**—शकुनानीव काव्येऽस्मिन् अपशकुनान्यपि बाहुल्येन दृश्यन्ते। रामजन्मकाले सर्वत्रायोध्यायां शुभानि शकुनानि भवन्ति। किन्तु तदैव लङ्कायां विविधान्यपशकुनानि भाविनाशं सूचयन्ति-

**दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः।**

**मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुविन्दवः।।10.75**

इत्थमेव कुद्धजामदग्न्यागमनाद् पूर्वं ससैन्यं दशरथस्य समक्षं मार्गेऽपशकुनानि भवन्ति। सीतायाः सव्येतरनेत्रस्पन्दनेनापि भाविदुःखं वनगमनमार्गे सूचितं भवति।[10]

**दिव्यप्रथा**—प्रथैषा सत्यसतीत्वाचरणादीनां विशुद्धिं प्रमाणयितुं प्रचलिता आसीत्। सीतापावित्र्यं प्रमाणयितुं लङ्कायामग्निप्रवेशः दिव्यप्रथायाः स्वरूपं प्रमाणयति। भूतलप्रवेशप्रसङ्गे वाल्मीकिमुनेः निर्देशेन सीता दिव्यरूपेण ब्रूते-

**वाङ्मनः कर्मभिः पत्यौ व्यभिचारो यथा न मे।**

**तथा विश्वम्भरे देवि! मामन्तर्धातुमर्हसि।।15.81**

समासेनात्र वक्तुं शक्यते यत् महाकवेः कालिदासस्य रघुवंशवर्णिते समाजे विविधाः लौकिक्यः प्रथाः दृश्यन्ते। मानवसंस्कराणां सम्पादनक्रमे प्रथानां महत्त्वं विद्यतेऽत्र। सामाजिकजीवनं नियमयितुं प्रथा विशिष्टसाधनरूपेण प्रयुक्ता वर्तते। वस्तुतः प्रथाभिरेताभिः न केवलं वैयक्तिकव्यवहारो नियम्यते अपितु व्यक्तित्व-निर्माणकार्येण सांस्कृतिकं सामाजिकञ्च जीवनं परिष्कृतिं भजति।

❖

## सन्दर्भाः


1. गोपालकृष्ण अग्रवाल, समाजशास्त्र, पृ.14
2. Society. p.81 - MacIver ang page.
3. मनुस्मृतिः
4. रघुवंशम्, 3.16
5. तत्रैव, 7.32
6. तत्रैव, 9.46
7. तत्रैव, 15.82-83
8. तत्रैव, 1.38-45
9. तत्रैव, 4.21-25
10. तत्रैव, 14.49
11. तत्रैव, 12.104


❖




आरण्यकम् मार्च 2011 ISSN 0975 - 0061

अर्धवार्षिकं संस्कृतशोधपत्रम् आर.एन.आई. सं.58951/94


## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्) - स्व. पण्डित कमलाकान्त उपाध्यायः — 15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः) -श्री देवकुमार मिश्रः 'अलमस्त' — 15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा - श्री नर्मदेश्वर ओझा — 15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन' — 35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा — 51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा — 51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः' — 41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य' - श्री जगदीश्वर प्रसाद मिश्र 'नलिन' — 51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन' — 51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा — 41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा — 21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. वज्रभूषणमिश्र 'आक्रान्तः' — 51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन' — 51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः' — 51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः — 60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः — 204 रूप्यकाणि